MSS No. 135 Subject Philosophy

Name of MSS सिद्धान्त चन्द्रोदय

Author कृष्णाचुर्जटा कृत

Period Not Available Folios 47 (001+007 to 052)

Script Sanskrit Source Prithipal Singh

Missing Folios 002 to 006

पृथिवीं विभजते सेति द्विविधं व्युत्पादयति नित्येति नित्यत्वं ध्वंसभिन्नत्वे सति ध्वंसाप्रतियोगित्वम् अनित्यत्वं ध्वंसप्रतियोगित्वं परमाणुरूपेति ननु परमाणुसद्भावे किं मानमिति चेदुच्यते गवाक्षरन्ध्रेण रश्मौ किरणस्य सर्वतः सूक्ष्मं यद्रज उपलभ्यते तत्त्र्यणुकमित्यभिधीयते तत्त्र्यणुकमवयवजन्यं चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन त्र्यणुकावयवः सिद्ध्यति स एव द्व्यणुकः सोऽप्यवयवजन्यो महदारम्भकत्वात् कपालवदित्यनुमानेन तदवयवः सिद्ध्यति स एव परमाणुरित्युच्यते अनवस्थाभिया चावयवधारा नोररीक्रियते अन्यथा मेरुसर्षपयोरपि साम्यप्रसंगः परमाणोरनित्यत्वे विना समवायिका

साहि द्विविधा नित्या अनित्या च नित्या
परमाणुरूपा अनित्या कार्यरूपा

रणाभावकार्योत्पत्तिप्रसंगः इति परमाणुप्रमाणादर्शनं कार्यरूपेति अवयविनी चेत्यपि बोध्यम् अत्र नास्तिकः अवयविसद्भावे न मानम् अयं घट इति प्रतीतिर्हि परमाणुपुञ्जे एवोपपद्यत इति ननु परमाणूनामतीन्द्रियत्वे न घटस्याप्यतीन्द्रियत्वापत्तेः न चैकस्य केशस्य दूरेऽप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वमिति वाच्यं सन्निधाने एकस्यापि केशस्य प्रत्यक्षसंभवेन दृष्टान्तवैषम्यात् किंचायं घट इति ज्ञानविषयताया अनेनपरमाणुकल्पने गौरवाच्चेति सारम् इति परमाणुपुञ्जवादनिरासः ॥

त. टी.

७

काश्चित्रूपपृथिवींविभजते पुनरिति काश्चित्रूपेति शेषः एवमग्रेऽपि ध्येयं विधेयैकदेशमाह शरीरेति भेदपदं प्रत्येकं योज्यं
अन्त्यावयवित्वे सति चेष्टाश्रयत्वं शरीरत्वं वृक्षादिवारणाय सत्यन्तं घटादिवारणाय विशेष्यं अन्त्याऽवयवित्वं च अव
यवजन्यत्वे सत्यवयवाजनकत्वं अवयवत्वं च द्रव्यसमवायिकारणत्वं अवयवित्वं च जन्यद्रव्यत्वं चेष्टा च हिताहितप्राप्ति
परिहारार्था क्रिया तदिदं शरीरं द्विविधं योनिजमयोनिजं च शुक्रशोणितपरस्परमेलनजन्यं योनिजं तद्भिन्नमयोनिजं
आद्यमपि द्विधा जरायुजमण्डजं च गर्भाशयकचर्मपुटकं जरायुस्तज्जन्यं जरायुजं यथास्मदादीनां अण्डजं
पक्ष्यादीनां अयोनिजं त्रिधा स्वेदजमुद्भिज्जमदृष्टविशेषजन्यं च स्वेदजं मत्कालिकादीनां उद्भिज्जं वृक्षादीनां अदृष्ट
विशेषजन्यं मन्वादीनां ननु वृक्षादीनां शरीरत्वे किं मानमिति चेच्छृणु वृक्षः शरीरी आध्यात्मिकवायुसंबंधादि

पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात् ॥ ॥ ॥

त्यनुमानं ननु तत्रैव मानेन पश्याम इति चेद्वृक्षः आध्यात्मिकवायुसंबंधवान् वृद्धिक्षतादिमत्त्वादित्यनुमानं कल
य मन्वादीनामयोनिजत्वे च ब्रह्मणो मानसाः मन्वादयः पुत्रा इति श्रुतिः प्रमाणं इति शरीरसामान्यनिरूपणं शब्दे
तरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वं शब्देतरोद्भूतविशेषगुणाः घट
निष्ठरूपादयस्तदनाश्रयत्वे ज्ञानकारणीभूतो यो मनःसंयोगस्तदाश्रयत्वं चक्षुरादावस्तीति लक्षणसमन्वयः
भवत्वेवेन्द्रियमनःसंयोगस्तथाप्यात्मा मनसा संयुज्यते मन इन्द्रियमर्थेन ततः प्रत्यक्षमिति नियमात् आत्मवारणा
य सत्यन्तं कालधारणाय विशेष्यं श्रोत्रे व्याप्तिवारणाय शब्देतरेति चक्षुरादीनां वारणायोद्भूतेति इन्द्रियाण्यसं·

राम.

७

योगाश्रयत्वस्य चक्षुरादौ सत्वाद्धि शेषगुणेति स्वध्वंसकारणीभूतः कालमनःसंयोगस्तदाश्रयत्वं कालइतिज्ञान
पदे इन्द्रियावयवार्थावयवयोः सन्निकर्षोपि ज्ञानकारणं तदाश्रयत्वमिंद्रियावयवे गतं यद्वा कालेरूपं सात्ती
तिप्रत्यक्षप्रति चक्षुः संयुक्तविशेषतायाः कारणत्वेन तद्घटकीभूतसंयोगाश्रयत्वं कालेगतं ततो मनः पदं नचा
त्मवारणाया त्मान्यत्वमेव निवेश्यतामिति शंक्यमन्त्यसंयोगस्य ज्ञानकारणतापत्ते त्वचि दोषात् इतीदि

म
शारीरंमदादीनाम

यमासामान्यनिरूपणाम् भोगोपयोगीविषयः भोगश्च सुखदुःखान्यतरसाक्षात्कारः यद्येतल्लक्षणं शरीरेस
त्तिव्याप्तमितिविभाव्यते तदा शरीरेन्द्रियभिन्नत्वमेव तदनुसर वस्तुतस्तु शरीरादिकमपि विषयपद भेन
कीर्त्तनंत्वबालधीवैशद्याय इतिविषयसामान्यनिरूपणाम् पार्थिवशरीरंदर्शयति शारीरमिति आदिप
देनपश्वादीनां परिग्रहः गंधवच्छरीरं पार्थिवमिति तल्लक्षणं बोध्यम् अत्र जलादिशरीरे पार्थिवत्वाभावात् चभौतिकत

प २

तर्क.टी.
८

एवमन्यत्रापि पार्थिवेन्द्रियस्य लक्षणमाह इन्द्रियमिति चक्षुरादावतिप्रसंगवारणाय गंधग्राहकमिति सन्निकर्षे व्य
भिचारवारणायेन्द्रियमिति अथवा पार्थिवेन्द्रियं दर्शयति गंधवदिन्द्रियं पार्थिवेन्द्रियमिति तल्लक्षणं बोध्यं एवमग्रेपि ननु पा
र्थिवेन्द्रियं निष्प्रयोजनत्वादनादरणीयमित्याशंकां निरसितुं तत्प्रयोजनमाह गंधग्राहकमिति तथा च गंधग्रहरू
पतत्प्रयोजनमस्ति तज्जनकत्वात्पार्थिवेन्द्रियमावश्यकमेवेति भावः इदमुपलक्षणं येनेन्द्रियेण यद्गृह्यते तेनेन्द्रि
येण तन्निष्ठा जातिः तदभावश्च गृह्यत इति नियमात् गंधत्वादेरपि ग्राहकमित्यर्थः ननु तत् गंधग्राहकं तेन
घ्राणनामकमिन्द्रियं तथापि तस्य पार्थिवत्वे किं मानमिति चेन्मैवं घ्राणेन्द्रियं पार्थिवं रूपादिषु पंचसु मध्ये गंध

इन्द्रियं गंधग्राहकं घ्राणं नासाग्रवर्ति विषयो मृत्पाषाणादिः शीतस्पर्शवत्य आपः ता द्विधाः नित्या अनित्या
श्च नित्याः परमाणुरूपाः अनित्याः कार्यरूपाः पुनस्त्रिविधाः शरीरेन्द्रियविषयभेदात् शरीरं वरुणलोके ॥

स्यैवाभिव्यंजकत्वात् कुंकुमगंधाभिव्यंजकगोघृतादिवदित्यनुमानं एव पार्थिवभागवेदित्यनुमानं स्यैव मानत्वा
न च शरावस्थगंधव्यंजकजले व्यभिचारवारणायैवकारः मध्यान्तोपपादनेन घ्राणस्य गंधत्वव्यंजकत्वेपि तत्
तिः तस्य संस्कृतमाह घ्राणमिति घ्राणपदप्रतिपाद्यमिति भावः तदाश्रयमाह नासाग्रेति पार्थिवविषयं दर्शय
ति विषयइति आदिना पुष्पादिपरिग्रहः गंधवान्विषयः पार्थिवो विषय इति तल्लक्षणं बोध्यं इति पार्थिवयं
थः जलं लक्षयति शीतेति न च चंदने शीतं शीतं शिलातलमित्यादि प्रतीतेः पृथिव्यामतिव्याप्तिरिति वाच्यं ज
लसमवेतस्पर्शस्यैव स्वसमवायिसंयोगसंबंधेन तत्र भानात् जलं विभजते इति शरीरमिति अस्मद्योनिजमे
व एवमुत्तरत्रापि न तु जलीयशरीरस्य तालवदंतकरादिसंभवेच्छाहारविहारादिसंभवात् कथं भोगायतनत्वमुपप

श्री येनइति मैवं मस्याः पार्थिवादिभागसंमिश्रितत्वेन करकादिवत् घनीभूय दृढीभूतस्य तस्य तालवादि वाग्व्यापारसंभवे नाहारादिसंभवाद्भोगायतनत्वो पपत्तेः ॥
८

एवमन्यत्रापि इंद्रियमिति नन्नु रसनेंद्रियस्य जलीयत्वे किं प्रमाणमिति चेदुच्यते रसनेंद्रियं जलीयं रूपादिषु पंचसु मध्ये रस
स्यैवाभिव्यंजकत्वात् लालावदित्यनुमानेन हरीतक्यामलकादौ व्यभिचारवारणायैवकारः तस्य जलमाधुर्यव्यंजक
त्ववत् कुंकुमादिरूपस्यापि व्यंजकत्वात् शेषं सुगमं विषय इति आदिना तद्वाकादिमकरकादीनां संग्रहः अथ हिमकरका
प. ६ दीनां जलीयत्वे तत्र नैमित्तिकद्रवत्वेन स्यादिति चेत्कोवानेति ब्रूते अदृष्टविशेषेण द्रवनीभावात् सांसिद्धिकद्रवत्वप्रतिबंधक
ल्पनादिति जलं यथा तेजसो लक्षणमाह उष्णेति उष्णजलमिति धौतेषु जलान्तर्गततेज उष्णस्पर्शस्यैवेति तच्चानाति ति
व्याप्तिः चंद्रकिरणादौ तेजस्त्वेऽपि उष्णस्पर्शानभिभूतत्वादुष्णस्पर्शस्यानुपलंभः चक्षुरादावनुद्भूतत्वान्न तथात्वं तेजोवि

इंद्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति विषयः सरित्समुद्रादिः उष्णस्पर्शवत्तेजः तद्द्विविधं नित्यमनित्यं च नित्यं प
रमाणुरूपं अनित्यं कार्यरूपं पुनस्त्रिविधं शरीरेंद्रियविषयभेदात् शरीरमादित्यलोके इन्द्रियं रूपग्राहकं च
क्षुः कृष्णताराग्रवर्ति

भजते तदिति चक्षुषस्तैजसत्वे च चक्षुस्तैजसं रूपादिषु पंचसु मध्ये रूपस्यैवा भिव्यंजकत्वात्
दीपप्रभावदित्यनुमानं प्रमाणं दृष्टांते वाय्वादौ व्यभिचारवारणायैवकारः रूपग्राहकमिति इदमुपलक्षणं मह
त्वोद्भूतरूपस्पर्शवद्द्रव्यतद्वृत्तिकर्मसामान्यसमवायसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्व
स्नेहानामपि ग्राहकमिति द्रष्टव्यं ननु वह्निरिंद्रियस्य व्यवस्थाप्यप्रकाशकत्वे नियमेन कनीनिकावर्ति चेत्तथा
कथं घटादीनां व्याप्तिरिति चेन्मैवं दीपप्रभाया इव तस्यापि विकासशालित्वेन तद्व्याप्तिसंभवात् न च शाखाचंद्रम
सोस्तुल्यग्रहणानुपपत्तिरिति वाच्यं शाखाचंद्रमसौ गृह्णामीति प्रतीतेर्भ्रमत्वे तेजसो निमेषापत्ति वेगशालित्वेन

[illegible]

प्रशस्तपादभाष्यानुसारेण विषयस्य चातुर्विध्यमाह विषय इति अन्यत्र तु उद्भूतरूपोद्भूतस्पर्शवाननुद्भूतरूपानुद्भू
त.दी. तस्पर्शवानुद्भूतस्पर्शानुद्भूतरूपवानिति चातुर्विध्यं दृष्टमाह भौमेति भौमादीति पदं प्रत्येकमभिसंबध्यते तत्र भौमश
२ ब्दादिति भौममिति पार्थिवमात्रेंधनं तेजो भौमं वह्न्यादिकमित्यत्रादिकमित्यत्रादिपदेनाखद्योतगततेजः संगृहीतः प
रिग्रहः दिव्यं दर्शयति दिव्यमिति जलमात्रेंधनं तेजो दिव्यं क्वचिदविंधनं दिव्यमित्यपि पाठः आदिनार्कचंद्रा
दीनां परिग्रहः पार्थिवजलोभयेंधनं तेज उदर्यं तदेवाभिधत्ते भुक्तेति भुक्तस्यान्नादेः पीतस्य जलस्य परिणामो जी
र्णता तत्र स्वदेहेतुरौदर्यमित्यर्थः तत एव तदुभयेंधनं आकरजं दर्शयति आकरजमिति आधनं तेन आकरजे सुव नि

विषयस्तु चतुर्विधः भौमदिव्योदर्याकरजभेदात् भौमं वह्न्यादिकं दिव्यं विद्युदा
दि भुक्तपीतपरिणामहेतुरौदर्यं आकरजं तु सुवर्णादि ॥ ॥ ॥ ॥ ॥

र्णादिकमित्यत्रादिना रजतादेः परिग्रहः अथ सुवर्णवादः ननु सुवर्णं पार्थिवं पीतत्वाद्धरिद्रावदिति चेन्नैतत् द्रुतत
त्वप्रभृति घृतत्वंतानलसंयोगे सति द्रवत्वानाशोपलंभेन जलादिरूपप्रतिबंधकत्वे सति तदनुपलंभेन च पार्थिवद्रवत्व
नाशे प्रतिप्रतिबंधकाभावविशिष्टात्यंतानलसंयोगस्य कारणत्वे न सुवर्णे तादृशसंयोगे सति द्रवत्वनाशापत्तेः मी २
मतिमिशितं २ मांसकास्तु न सद्रवसुवर्णे द्रव्यांशांशे किंचे तदपि न युक्तं द्रव्यांतराभावे संभवत्यतिरिक्तद्रव्यकल्पनायां अन्याय्यत्वात् रा.रू.
ननु सुवर्णस्य तैजसत्वे किं मानमिति चेदत्र ब्रूमः सुवर्णं तैजसं प्रतिबंधकात्यंतानलसंयोगेऽप्यनु
च्छिद्यमानद्रवत्वाधिकरणत्वात् यन्नैवं तन्नैवं यथा सर्पिरिति पार्थिवरूपस्पर्शाभ्यां तन्निष्ठभास्वररूपोष्णस्पर्शयोरभि

मवाटजहः इति विषयः इति तेजोग्रन्थः ॥

वायुं लक्षयति रूपरहितइति घटादिवारणाय विशेषणं आकाशादिवारणाय विशेष्यं अथ वायुप्रत्यक्षत्ववादः ननु वायु
सद्भावे किं मानमिति चेदत्र प्राञ्चः विषयतासंबंधेन वहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति समवायसंबंधेन महत्त्वविशिष्टोद्भूत
रूपमुद्भूतस्पर्शश्च कारणं एवं च सति वायोस्तदभावाद्वायुर्न प्रत्यक्षः किं त्वनुमेयः तथाहि योयं वायौ वाति सत्यनुष्णाशी
तस्पर्शो लोके प्रतीयते सः स्पर्शः क्वचिदाश्रितः गुणत्वाद्रूपवदित्यनुमानेन यत्किंचिद्द्रव्याश्रितत्वे सिध्यति तदेव वायुरित्युच्यते
न च तत्स्पर्शः पृथिवी भवितुमर्हत्युद्भूतस्पर्शवत्याः पृथिव्या उद्भूतरूपवत्त्वनियमात् नापि जलतेजसी तयोरनुष्णाशीतस्पर्शा

रूपरहितस्पर्शो वायुः ॥

भावात् नाप्याकाशादिचतुष्टयं तस्य विभुत्वेन सर्वत्र तादृशस्पर्शप्रत्यक्षत्वापत्तेः नापि मनः तस्याणुत्वेन स्पर्शस्याप्रत्यक्ष
त्वापत्तेरित्याहुः नवीनास्तु वहिर्द्रव्यप्रत्यक्षं प्रति महत्त्वं विशिष्य विभुव्यावृत्तविशेषगुणः महत्त्वविशिष्टोद्भूतरू
पोद्भूतस्पर्शान्यतरश्च कारणं एवं सति वायुरपि प्रत्यक्ष एव तत्र तादृशगुणस्य महत्त्वविशिष्टोद्भूतस्पर्शस्य सत्त्वात्
इत्यवेयावायुं स्पृशामि प्रभां पश्यामि तप्तजले तेजः स्पृशामीत्यनुभवापलापप्रसंगः नचायं भ्रमः जलं स्पृशामीत्यत्र
भ्रमस्यापि तथात्वापत्तेः ननु द्रव्यचाक्षुषं प्रति द्रव्यस्पार्शनं प्रति च प्रत्येकं किं कारणमिति चेदाद्ये महत्त्वविशिष्टोद्भू

वायुं विभजते सचद्विविध इति शरीरमिति तच्च पिशाचानामपि स्पर्शग्राहकमितीदमुपलक्षणं महत्त्वोद्भूतरूपस्पर्श-
वत्त्वद्रव्यत्वहेतुः इति कर्मसामान्यसमवायसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहानामपि ग्राहकं त्वगि-
त॰दी॰ न्द्रियमित्यर्थः तस्य वायवीयत्वे त्वगिन्द्रियं वायवीयं रूपादिषु पंचसु मध्ये स्पर्शस्यैवाभिव्यंजकत्वात् अंगसंगिसलि-
९ लशैत्याभिव्यंजकव्यजनपवनवदित्यनुमानं मानं सलिलशैत्यव्यंजके मनसि पलादौ चातिप्रसक्तिवारणायैवका-
रः वृक्षादीत्यत्रादिपदेन जलादीनां परिग्रहः ननु प्रमाणस्याधिकस्य सत्त्वात् कथं न कृतस्तद्विभाग इत्यत आह शरीरान्त इति

स च द्विविधो नित्योऽनित्यश्च नित्यः परमाणुरूपः अनित्यः कार्यरूपः पुनस्त्रिविधः विषयभेदात् शरीरं वायुलोके
इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति विषयो वृक्षादिकंपहेतुः शरीरान्तः संचारी वायुः प्राणः स चैकोऽप्युपाधि-
भेदात्प्राणापानादिसंज्ञां लभते ॥

तथा च विषयवायौ तस्यान्तर्भाव इत्यर्थः अपानादेरतिरिक्तत्वमा-
शंक्य प्राणे तस्यान्तर्भावमाचष्टे स चेति प्राणस्त्वेकोऽपीति एक एव प्राणो हृदयादिरूपोपाधिभेदात्प्राणापाना-
दिशब्दैर्व्यवह्रियत इत्यर्थः अथवा मुखनासिकाभ्यां निर्गमनप्रवेशनात्प्राणः मलादेरधोनयनादपानः भुक्तप- राम॰
रिणामाय जाठरानलस्य समुन्नयनात्समानः अन्नादेरूर्ध्वनयनादुदानः नाडीमुखेषु विततनाद्व्यान इति क्रियारूपोपा- ९
धिभेदादन्यथा व्यवह्रियत इत्यर्थः एवं नागकूर्मकृकलदेवदत्तधनंजयाख्यवायूनामपि प्राणेऽन्तर्भावः नाग उद्गारहेतुः

कूर्म उन्मीलनस्य कृकलः क्षुधायाः देवदत्तो विजृम्भणस्य धनंजयोपि पोषणस्येति बोध्यं इति वायुः ॥ इ
दानीं कार्यद्रव्यस्योत्पत्तिविनाशक्रममात्र चत्वारि परमेश्वरस्य चिकीर्षावशात्परमाणुषु कर्मोत्पत्तिः तदनंतरं द्व
योः परमाण्वोः संयोगस्ततो द्व्यणुकोत्पत्तिः तत्र परमाणुः समवायिकारणं परमाणुद्वयसंयोगोऽसमवायिकार
णं परमेश्वरस्य ज्ञानेच्छाकृतयः कालादिक् प्रागभावादृष्टप्रतिबंधकाभावश्च निमित्तकारणं एतेषां कार्य
मात्र एव निमित्तमात्रत्वात् तदनंतरं त्रिषु द्व्यणुकेषु कर्मोत्पत्तिस्ततस्तेषां संयोगस्ततस्त्र्यणुकोत्पत्तिः एवं च
तुरणुकाद्युत्पत्तिक्रमेण महापृथिवी महत्य आपः महत्तेजो महान्वायुरुत्पद्यते ननु त्रिभिः परमाणुभिः कु
तो न त्र्यणुकमारभ्यते द्व्यणुकद्वयेन वा कुतो न त्र्यणुकमुत्पद्यते इति चेन्न प्रथमस्य द्रव्यारंभकत्वे गौरवात्
प्रमाणाभावाच्च द्वितीयस्य तथात्वे त्र्यणुकमहत्त्वानुपपत्तेः कार्यमहत्त्वे कारणबहुत्वस्य कारणमहत्त्व
स्य वा कारणत्वात् एवं परमेश्वरस्य कार्यद्रव्यसंजिहीर्षावशात्परमाणुषु कर्मोत्पत्तिः ततः परमाणुद्वयवि
भागः ततः परमाणुद्वयसंयोगनाशस्ततस्त्र्यणुकनाशः एवं चतुरणुकादिनाशक्रमेण महापृथिव्यादीनां ना
शः अयमेवावांतरप्रलयः सर्वकार्यद्रव्यध्वंसस्यैवावांतरप्रलयत्वात् महाप्रलयश्च सर्वाभावकार्यध्वंसः भाव
कार्यं चानित्यद्रव्यमनित्यगुणः कर्म च किं पुनः सृष्टिप्रलययोः सद्भावे प्रमाणमिति चेत् धाता यथापूर्वमकल्प
यदित्यादि श्रुतिः मीमांसकास्तु संसारप्रवाहस्य बीजांकुरन्यायेनानादित्वादनंतत्वाच्च प्रलयः सद्भावे मानाभ
भावस्तत्त्वतः अत्र प्राचः क्वचिदसमवायिकारणनाशाद्द्रव्यनाशः क्वचिदसमवायिकारणनाशाद्द्रव्यनाश इ
ती चक्रुः नव्यास्तु लाघवात्सर्वत्रासमवायिकारणनाशान्न समरुरी चक्रुरित्यलं पल्लवेन इति कार्यद्रव्योत्पत्ति

तर्कसंग्रहचन्द्रिका ॥

आकाशं लक्षयति शब्दगुणमिति शब्दो गुणो यस्य तत्तथा यद्यपि शब्दवत्त्वमेव लक्षणमुचितं तथापि भाट्टानां
मते शब्दस्य द्रव्यत्वं तन्निरासार्थं गुणपदमुपात्तं क्वचिच्छब्दगुणकमाकाशमित्यपि पाठः गुण एव शब्दगुणक
मिति स्वार्थे कः यद्वा शब्दं गुणं करोति जनयतीति शब्दगुणयतीति वा शब्दगुणकं शब्दसमवायिकारणमिति
यावत् एतेनाकाशे प्रमाणमपि दर्शितं तथाहि शब्दोऽष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे सति सम
वायिकारणकत्वात् यन्नैवं तन्नैवं यथा रूपमिति परिशेषानुमानेन तादृशद्रव्यविधयाकाशः सिध्यति रूपादिवा
रणाय सत्यंतं रूपत्वादिवारणाय विशेष्यं परिशेषश्च प्रसक्तस्य प्रतिषेधेऽन्यत्राप्रसंगात् शिष्यमाणे संप्रत्ययः
न च विशेष्यासिद्धिः शब्दोऽसमवायिकारणकः जन्यगुणत्वात् पृथिवीरूपवदित्यनुमानेन तत्सिद्धेः न च वि
शेषणासिद्धिरपि शब्दोऽष्टद्रव्यानाश्रितः श्रोत्रग्राह्यत्वात् शब्दत्ववदित्यनुमानेन तस्यापि सिद्धेः [illegible]
गुणः अनित्यत्वे सत्यैकेंद्रियग्रा — शब्दगुणमाकाशं तच्चैकं विभु नित्यं च — ह्यजातीयत्वाद्रूपवदित्यनुमाने
मानं द्व्यणुकादावनैकांतिक — त्ववारणाय जातीयेति अन्यत्स्प
ष्टं आकाशस्य पृथिव्यादिवदनेकत्वे मानाभावादाह तच्चैकमिति च स्वार्थे न चाकाशस्यैकत्वे घटाकाशो म
ठाकाश इति व्यपदेशः कथमिति वाच्यं घटादिरूपोपाधिभेदेन तादृशव्यपदेशात् सर्वत्र शब्दोपलंभादाका
शस्य विभुत्वमावश्यकमिति सूते विभ्विति आकाशस्य विभुत्वादेवानित्यत्वे सत्यतो न्याह नित्यं चेति नन्वा
त्मन आकाशः संभूत इति वेदेनाकाशस्य जन्यत्वप्रतिपादनात्कथं तन्नित्यं यज्जन्यं तदनित्यमिति व्याप्तेरिति
चेन्न संभूत इत्यस्य [illegible] पार्थिवशब्दाभिव्यक्त्युत्पत्तिकत्वात् इदमत्र चिंत्यं आकाशस्य शरीरे नोपनीतेन परं विशे
षमस्ति तत्र श्रोत्रं शब्दधीजनकमिति श्रोत्रे श्रोत्रेन्द्रियस्याकाशत्वे कथमिति चेन्न यदीदृशं रूपादिष्वमध्येय

कालंलक्षयति अतीतेति अतीत इत्यादिर्यो व्यवहारः अतीतो भविष्यन्वर्त्तमान इत्यात्मकस्तस्यासाधारणं हेतुः
काल इत्यर्थः न निरुक्तलक्षणमाकाशेतिव्याप्तं व्यवहारस्य शब्दात्मकत्वादिति चेन्न अत्र हेतुपदेन निमित्तहेतोर्वि
वक्षितत्वात् न चैवमपि कण्ठताल्वाद्यभिघातेतिव्याप्तिरिति वाच्यम् विभुत्वस्यापि निवेशात् अथैतल्लक्षणं क
थं महाकाले अतीत इत्यादिव्यवहारस्य रविक्रियादिरूपखण्डकालैर्नियम्यत्वादिति मैवं मंस्थाः महाकाले उपा
धिभेदेन तादृशव्यवहारभेदसंभवात् अतीतत्वं च वर्त्तमानध्वंसप्रतियोगित्वं भविष्यत्त्वं च वर्त्तमानप्रागभावप्र
तियोगित्वं वर्त्तमानत्वं च दृश्यमानोपाधित्वं महाकालेऽतीतत्वादिकं दर्शितं प्रायमित्यलमतिकठिनविषयका न
तारप्रदर्शनेन शिशूनां अथ काले किं मानमिति चेत् शृणु बहुतरदिवाकरक्रियाविशिष्टशरीरज्ञानानां
लिकुपरत्वोत्पत्ति अतीतादिव्यवहारहेतुः कालः स चैको विभुर्नित्यश्च रिति ग्राह्यं ततः तज्ज्ञानं विशेषणविशेष्यो
भयसंबंधघटकसा ये तं साक्षात्संबंधाभावे सति वि
शिष्टज्ञानत्वाल्लोहितस्फटिकज्ञानवदित्यनुमानेन तादृशसंबंधघटकविधया कालः सिध्यति न च तादृशसंबं
धघटकत्वमाकाश आत्मा वा भवितुमर्हतीति तयोः शब्दज्ञानाश्रयत्वेनैव धर्मिग्राहकमानसिद्धत्वेन रविक्रियाघनाक
त्वासंभवात् तादृशसंबंधश्च स्वसमवायिसंयुक्तसंयोगः स च जगदाधारः कार्यमात्रे निमित्तकारणं चेति तमेव
माह तस्य जगदाधारत्वे कार्यमात्रं प्रति निमित्तकारणत्वे च कालः सर्वदानिदानीं घटो भवतीति प्रतीतिरेव माने
क्षणादिनमासस्योपाधिभेदान्त्रिविधापि नाना कालस्यैकत्वनिरूपणायमिति संधत्ते स चेति सर्वत्रकार्योत्पत्तेर्विभुत्वमपे
क्षत्वमित्यभिधत्ते विभुरिति विभुत्वादेव नित्यत्वं संपद्यत इत्याचष्टे नित्यश्चेति इति कालग्रंथः ॥ ॥ ॥

।कालं लक्षयति अतीतेति अतीतादिव्यवहारः अतीतो भविष्यन् वर्तमान इत्यात्मकस्तस्यासाधारणहेतुः
काल इत्यर्थः ननु दिग्लक्षणमाकाशे तिव्याप्तं व्यवहारस्य शब्दात्मकत्वादिति चेन्न अत्र हेतुपदेन निमित्तहेतोर्वि
तर्कदी· वक्षितत्वात् न चैवमपि कंठताल्वाद्यतिव्याप्तिः॥ दिशं लक्षयति प्राच्यादीति इयं प्राचीयमवाचीयं प्रतीचीयमुदीची
१२ त्यादिव्यवहारासाधारणकारणं दिगित्यर्थः ननु दिशि किं मानमिति चेदनुमानं तत्र प्रयोगप्रतिज्ञामात्रेण नार्थसि
द्धिरिति चेन्नैवं बहुतरमूर्तसंयोगविशिष्टपिंडज्ञानादैशिकपरत्वोत्पत्तिरिति निर्विवादं एवं च तत्र ज्ञाने विशेषणवि
शेष्ययोरुभयसंबंधघटकसापेक्षत्वं साक्षात्संबंधाभावे सति विशिष्टज्ञानत्वादित्यनुमानस्य जागरूकत्वात् संबंधश्च
बहुतरमूर्तसंयोगस्य स्वसमवायिसंयोगः तेन संबंधघटका दिक्सिद्धिरिति सा च जगदाधारनिखिलकार्यनिमित्त

प्राच्यादिव्यवहारहेतुर्दिक् सा चैका नित्या विभ्वी च

कारणं चेत्यभिहितमेवेति दिक् निखिलपदार्थवती इह वस्तो भवतीत्यादिनिर्देशाधीनत्वप्रमाणमिति मंतव्यं प्रा
च्यादिव्यवहारस्योपाधिभेदप्रयोज्यत्वाद्दिगेकैवेति ब्रूते साचेति तथाहि यस्मादुदयाचलसन्निकृष्टेयन्मूर्तं तत
त्तस्य प्राची यथा प्रयागस्य काशी यस्मादुदयाचलविप्रकृष्टेयन्मूर्तं तत्तस्य प्रतीची यथा गंगायाः पाटलपुत्रस्य वा
काशी यस्मात्कनकाचलसन्निकृष्टेयन्मूर्तं तत्तस्यावाची यथा काश्मीरा रामेश्वरक्षेत्रे एवमवशिष्टेंतरे तदुक्तं सर्वे राम· १२
षामेव वर्षाणां मेरुरुत्तरतः स्थित इति एवं महादिशीममेवोपाधिभेदमादाय तादृशव्यवहारो बोध्यः इति
दिग्ग्रंथः ॥ ॥ ॥

आत्मानं निरूपयति ज्ञानाधिकरणमिति ज्ञानसमवायित्वेन ज्ञानाधिकरणत्वं तेन नाकालेनातिव्याप्तिः आत्मानं विभजते स इति परमात्मेति परसमत्वमुक्तं एवं तच्च प्रकृते सृष्ट्यादिकर्तृत्वं परमात्माजीवयोर्वैलक्षण्यमभिधत्ते तत्रेति परमात्मजीवयोर्मध्ये परमात्मा ईश्वरः सर्वज्ञश्च भवति स एक एवेत्यर्थः नित्यज्ञानाधिकरणत्वं लक्षणमवगन्तव्य मीश्वरैकत्वे नित्यज्ञानमिति चेत् सर्गाद्यवसरे परमाणुना द्व्यणुकं करिष्यामीति ज्ञानस्यावश्यकत्वेन तदुत्पादकत्वेन शरीरादिकारणकलापस्य तदानीं व्यतिरेकेण तस्य नित्यत्वमुररीकुर्मः इत्थमीश्वरेच्छाकृत्योरपि अत्र चार्वाकाः

ज्ञानाधिकरणमात्मा स द्विविधः परमात्मा जीवश्च तत्रेश्वरः सर्वज्ञः परमात्मैकश्च ॥

ईश्वरसद्भावे मानाभावः न च प्रत्यक्षं प्रमाणमिति वक्तव्यं तार्किकाणां मतेनारूपस्पर्शद्रव्यत्वेन बाह्यप्रत्यक्षासंभवात् नाप्यान्तरमपि मनसा परात्मप्रत्यक्षासंभवात् नाप्यनुमानं ईश्वरनिरूपितव्याप्तेरप्रसिद्धेः न च द्यावाभूमी जनयन्देव एक इति विश्वस्य कर्ता भुवनस्य गोप्तेत्यादिवेदः प्रमाणमिति ईश्वरोक्तत्वाद्वेदस्य प्रमाणसंभवेनेश्वराभावे तस्याप्रामाण्यापादित्वात् तदसत् यत्र कार्यत्वं तत्र कर्तृजन्यत्वमिति व्याप्तेः प्रसिद्धत्वेनाङ्कुरादिकं कार्यं कर्तृजन्यं कार्यत्वात् घटवदित्यनुमानेन कर्तृजन्यत्वे साधनीये तत्कर्तृत्वेनेश्वरसिद्धेः न च विमाकर्तृधरणे सलि

त्वसंयोगादिभिरेवांकुरादीनामुत्पत्तिनिर्वृत्तिरिति शंक्यं घटादीनामपि तथात्वापत्तेः तदुक्तं जगतां यदि नो कर्ता कुलाले
न विना घटः चित्रकारं विना चित्रं स्वत एव भवेत्ततः इति न च स्वेदजादीनामपि तथात्वेकृत्यन्तरितिवाच्यं तेषामपि
पक्षतावच्छेदकाक्रांतत्वात् नियंतृत्वभावे विपरीतोदयापत्तिः एवं जलधरपटलेन काले वृष्ट्युत्पादापत्तिः सचेतन
मन्तरेणाचेतननियतकाले गमनासंभवात् तस्माज्जगत्कर्ता कश्चनावश्यकः स एवास्माकमीश्वरः एवं पतनाभा
ववद्गुरुत्वाश्रयः पतनप्रतिबंधकप्रयत्नवत्कोऽधृतिमत्त्वादित्याद्यनुभवस्य प्रामाण्यमप्यूह्यं एवमीश्वरमु
पासीनयस्यज्ञानमयं तप इत्यादिश्रुतयोऽनुसंधेयाः कर्तृत्वं च कृतिमत्त्वं यत्तूपादानगोचरापरोक्षज्ञानचिकीर्षा
कृतिमत्त्वे कर्तृत्वमिति तन्न गौरवात् केचित्तु कार्यमात्रं प्रति जीवेश्वरयोर्न कर्तृत्वेन कारणत्वं अनेक
कृतिषु कारणतावच्छेदकत्वे गौरवात् किं त्वात्मत्वेनैव एवं सतीश्वरसाधारणात्मत्वे जातिरपि
सिध्यति एतेन सुखादिसमवायिकारणतावच्छेदकतया नेश्वरत्वसाधारण्यासि
ध्यतीतिप्रसादरणेऽपि न तति अथ कथमीश्वरसाधकानुमानमिति चेदं
कुरादिकमात्मजन्यं कार्यत्वात् घटवदितीति विभावयामः
ततः मीमांसकास्तु कर्मैवेश्वरो मंत्रमयी देवता च ॥

र्थवादत्वेनाप्रमाणमितिगदंति मीमांसकैकदेशिनस्तु कर्मातिरिक्तएवेश्वरइतिसम्मूचिरे इतीश्वरवादः नन्वी
श्वरः किंशरीरीउतनतद्वितः नाद्यः तच्छरीरस्यमहत्त्वे उडुंबरफलादौमशकविशेषोत्पत्तिर्नस्यात् तत्रतस्यप्रवेशा
संभवात् मध्यमपरमाणुत्वेनित्यत्वप्रसंगात् देशांतरेकार्यानुत्पत्तिप्रसंगाच्च अणुत्वेदृष्टादरीदृश्यतेएव नांत्यः
शरीराभावेकर्तृत्वस्यैवासंभवादितिचेन्न शरीरवत्प्रकर्तृत्वेमानाभावात् शरीरमंतरेणैवेश्वरेणामेघादिवत्का
र्योत्पादनात् ईश्वरस्यपरमाणुएवशरीरमितिकेचित् आकाशशरीरंब्रह्मेतिश्रुतेराकाशमेवतदित्यपरे अन्ये
तु संसारिणामदृष्टवशादीश्वरस्यशरीरमितिब्रुवंति परेतुभूतावेशन्यायेनेश्वरस्यशरीरमितिमेनिरे अत्राहुः
ईशः शरीरमितिब्रुवंति परेतुभूतावेशन्यायेनेश्वरस्यशरीरमितिमेनिरे इतितएवपूर्वेतुमतत्वज्ञानसाध्यापव
मपुरुषार्थपदप्रणालिकामूलीभूतोपासनादेभिः संसारपंकनिमग्नजनोद्दिधीर्षुर्लीलाविग्रहं दधातिसच
शिवशक्तिगणेशार्कविष्णुनाम्नापञ्चधा तदुक्तं शिवशक्तिगणेशार्कविष्णुरूपात्महेश्वरः उपासनानुसा
रेणभक्तेभ्योमुक्तिदइति अत्रवैष्णवाः शिवादीनांनेश्वरत्वंशिवस्तुविष्णोरुपासकः तामसत्वान्नोपास्यश्च
शक्तिस्तुतदीयामाया ब्रह्मादयस्तुतदाज्ञानुवर्तिनः किंचलक्ष्मीनिवाससाम्यंकुतः शिवस्यश्मशानवासि
नः कुतस्तरांशक्त्यादीनां अन्यच्चविष्णुव्यतिरिक्तानामुपासनैवनिषिद्धा तदुक्तं वासुदेवंपरित्यज्ययउपास्ते
न्यदेवतां तृषितोजाह्नवीतीरेकूपंखनतिदुर्मतिरितित्याहुः अथशैवाः श्रीमच्छिवस्यकदाचिल्लेशमात्र

माश्रित्यमहादेवीप्रागभवत्तोविल्वादीनामाश्वरत्वेकृतः विलोस्तशिवोपासकः अतएवस्वनेचमर्दयित्वाच
न. टी. कीपुंडरीकात्तइतिनामलब्धवानारायणोत्तरेणलक्ष्मीवैकुंठंच अतएवाद्यापिरामेणपूजितोरामनाथः सतो
१८ मत्यन्तप्रसिद्धः नचतर्दिकथंविल्लुचरणोदकं विभर्तिदूत्वइति तच्चभक्तिपराधीनत्वात् अतएवेश्वरः परमेश्वर
त्वायेभेवव्यवह्रियते शक्तिरस्यैवमायाद्यः शुद्धस्फटिकसंकाशः सूर्यचंद्राग्निलोचनः लीलानाटकसूत्रधारः
क्वचिद्घोररूपः क्वचित्सौम्यरूपः क्वचित्श्मशानवासी क्वचिदनेकदेवगणसमाश्रितस्त्वनुपमकैलासशिव
लोकादिवासीतस्यशिवस्यमाम्यंकृतोविल्वादीनांकृतोवाउपास्यत्वे शिवस्तामसइति यदुक्तंतत्तुच्छेंद्राव
तात्स्यभिन्नत्वात् यच्चश्मशानवासित्वेननैकरूपदर्शितं तदपितस्यस्वातंत्र्यात् तदुक्तं अनेनतद्रूपस्यशिव
वस्यलीलयाविदारणोलस्यविचित्रकर्मणः अनेकरूपणाचभीषणेन तत्स्वरूपहानिर्नभवेत्कदाचनेति स्व
विवाकृतत्वस्यदुःखेकृतोवाकृतंस्वदरत्वे अनेकैःप्रकारैःसदालीलयाविलसत्सृष्टिस्थितिनाशयस्येतिच किंचशिवाति
रिक्तदेवतानामुपासनैवनिषिद्धा महादेवंपरित्यज्ययदुपास्तेन्यदेवतं समूढोविषमश्नातिसुधांत्यक्त्वात्सु
धातुरः इतिगायंति अत्रशक्तिकाः किंभोगयाशक्त्याब्रह्मविष्णुमहेशानिर्मिताः यत्कृपामवलंब्यस्वस्वा राम. १८
दिरचयतितत्साम्यमपिप्रा॥ ॥

मुनींद्र इति ऋतोवा तदधीनकत्वं तदुक्तं स्मृतं चैतिवर्णयामासुः अथ स्मार्तपौराणिकादयः तेषां भेदवादिनां न
मात्वाभिः तदुक्तं शिवस्य हृदयं विष्णुः विष्णोश्च हृदयं शिवः ईषदप्यंतरं कृत्वा रौरवं नरकं व्रजेत् एवमथर्ववेदो
प्याद् सब्रह्मा सशिवः सहरिः सेंद्रः सोक्षरः परमः स्वराडिति माधवो माधवावीशौ सर्वसिद्धिविधायिनौ वंदे परस्प
रात्मानौ परस्परनतिप्रियाविति माधवो माधवावीशौ सर्वसिद्धिविधायिनौ वंदे परस्परात्मानौ परस्परनति
प्रियाविति तत्र देवतायस्तावितत्र देवतासाम्यकत्वेकस्त्वष्यादिप्रदर्शनेकल्पभेद इति शापके अत एव श
क्त्यादीनामपि ताभ्यामभेदः तदुक्तं शैवाः शाक्ताश्च गाणेशाः सौरा विष्णुप्रपूजकाः विद्विषंति मिथो भ्रां
त्या तेषां भक्तिश्च निष्फला सिद्धांतमवदद्देवः प्रोक्ताः अन्यानानाप्रयोजनैः एतत्वेसाम भिप्रायं जानाति विर
लः कृती अनेकवाध्यसिद्ध्यर्थं रूपेबहुविधं विभोः तत्कार्यं ज्ञात्वा ततो लोके स्तन्यायं प्रतिष्ठितमिति ३
तिथाविशेषः यदि शिवे भक्तिर्मंदतीस्यात्तदा विष्णुरपि शिवत्वेनैव ज्ञेयः हरौ भक्तिर्वेकुलायदिस्यात्तदाह
रित्वेन भजेच्छिवं अतः कूपमंडूकन्यायेन लोकाज्ञानमूलमन्याभवंतीति जगद्गुरुः इतीश्वरवादः ॥ ॥

त.दी. जीवंनिरूपयति जीवइति तत्रेत्यचपठ्यते बंधमोक्षयोग्योजीवः जन्यज्ञानाधिकरणंवा प्रथमेनदेह
त्रइत्युच्यते प्रतिशरीरंभिन्नइति सुखदुःखादिवैचित्र्यादितिहेतुःपूरणीयः जीवस्याणुत्वेसर्वशरीरव्यापि
सुखाद्यनुपलब्धिप्रसंगः मध्यमपरिमाणत्वेऽनित्यत्वापत्त्याकृतहान्यकृताभ्यागमप्रसंगइत्यभिप्रायवा
१५ नाह विभुरिति विभुत्वान्नित्यत्वमर्थादायातमित्याह नित्यश्चेति ननुजीवसद्भावेकिंमानमितिचेन्न अहं
सुखीदुःखीतिमानसप्रत्यक्षस्यमानत्वात् नचात्मानावन्नप्रत्यक्षइतिवाच्यम् स्वपरात्मपरत्वात् प्रतिपादितं
चैतदात्मतत्त्वविवेके (न) ननुविप्रतिपन्नंप्रतिकथंप्रत्यक्षमुपन्यसितुंशक्यमितिचेन्नत्रानुमानमेवमानंबुद्ध्या

जीवःप्रतिशरीरंभिन्नोविभुर्नित्यश्च

दयः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रिताः तदनाश्रितत्वेसतिगुणत्वात् योयदनाश्रितोगुणः सतदतिरिक्त
द्रव्याश्रितः यथापृथिव्याद्यनाश्रितःशब्दइति सामान्यमुखव्यापकानुमानेननवमंद्रव्यमात्मासिध्यति नच
तेभूतानांगुणाभवंतीतिवक्तव्यं तथासतितेषामाभ्यंतरप्रत्यक्षानुपपत्तेः भूतगुणानांरूपादीनांबाह्य
प्रत्यक्षस्यैवानुभवसिद्धत्वात् अतएवभूतत्वंबहिरिंद्रियग्राह्यविशेषगुणवत्त्वमितिसंगच्छते विशेषगुण राम.
त्वादेवनदिक्कालमनसांगुणाः ननुविशेषगुणत्वपवमानेलभामहइतिचेत् बुद्ध्यादयोविशेषगुणाः १५

पकेंद्रियग्राह्यत्वे सति गुणत्वात् रूपवदित्यनुमानं मानं एवमिंद्रियं सकर्तृकं करणत्वात् कुठारवदित्यनुमाने
नाप्यात्मासिद्धेति अत्रापि केचिन्नास्तिकाः क्रमशः शंकते स्मेति शब्दो शून्यवादिनो माध्यमिकाः सुषुप्त्यव्यवहितो
त्तरक्षणेऽस्थितस्य सुषुप्तावहं नासमित्यनुभवाच्छून्यमेवात्मा अत एव सर्वमिदं मिथ्यैव तथा श्रुतिरप्याह असद
देवेदमग्र आसीदित्याहुः तदसत् सुषुप्तावहं नासमित्यनुभवस्य प्रामाण्ये कस्येत्यात्मनि तस्य ज्ञानाभावपरत्वा
त् यन्मिथ्येदमुक्तं तदपि न अन्यत्ततोऽनुभूयमानपदार्थज्ञानस्याशक्यापलापत्वा उपदर्शितवेदस्य गतिर्वक्ष्यते
क्षणिकविज्ञानवादिनो योगाचार्यास्तु क्षणिकविज्ञानमेवात्मा तत्तु द्विविधं प्रवृत्तिविज्ञानमालयविज्ञानं च
तत्रायं घट इत्यादि प्रवृत्तिविज्ञानं सुषुप्तावहमित्यालयविज्ञानं स्त्र्यादिकमस्यैव विकारः तदितिरिक्तं व
स्तुन एवाप्रसिद्धेः श्रुतिरपि अन्योऽन्तर आत्मा विज्ञानमय इति विज्ञानस्यैवात्मत्वमाहेत्याहुः तदसत् एवं तु
हृतपदार्थस्मरणानुपपत्तेः अनुभवितुरिदानीमभावात् अन्यानुभूते चार्थेऽन्यस्य स्मृत्ययोगात् ननु कस्तू
रीसुरभिपटवत्पूर्वविज्ञानोत्पादितसंस्काराणामुत्तरोत्तरविज्ञाने संक्रांतत्वमिष्टमिति मा भाषिष्ठाः तथा
सति त्वत्पित्रानुभूतपदार्थस्य गर्भस्थेन त्वया स्मरणापत्तेरित्याद्यन्यत्र विस्तरः सौत्रांतिकास्तु ज्ञानाकारानु
मेयक्षणिकबाह्यार्थ एवात्मेतीच्छंति वैभाषिकाः क्षणभंगुरवादिनस्तु क्षणिकबाह्यार्थ एवात्मेतिच्छंति

तदुभयमपीदं घटादीनांतथात्वेमानाभावात् एतेचत्वारोनास्तिकाबौद्धाःउक्तञ्चैतेबौद्धानामष्टादश
 भेदाःप्रसिद्धाः उपभेदास्तुविस्तरभियेहनोक्ताः चार्वाकास्तुब्राह्मणोहंगौरोहंस्थूलोहंजानामीत्या
 दिसामानाधिकरण्यप्रतीतेः ब्राह्मणत्वादिधर्मवतिशरीरएवज्ञानसुखाद्याश्रयत्वंसिद्धमितिशरी
रमेवात्मा तथाचश्रुतिः सवाएषपुरुषोन्नरसमयइति ननुशरीरस्यपार्थिवत्वेनघटादिवज्जडत्वा·
त्कथंज्ञानाश्रयत्वमितिमामंस्थाः केवलनागवल्लीदलस्यरागानुत्पादकत्वेपिनागवल्लीदलखदिर
चूर्णक्रमुपादायात्मकताम्बूलस्यरागोत्पादकत्ववत्केवलपार्थिवस्याचेतनत्वेपिभूतचतुष्टयसमुदा·
यात्मकपार्थिवस्यज्ञानाश्रयत्वेबाधकाभावादित्याहुः तन्न मृतशरीरेपिज्ञानापत्तेः ननुज्ञानंप्रतिप्रा
णस्यापिकारणत्वेनतदानींतदभावान्न तदुत्पत्तिरितिनैयायिकानांनयेआत्मनोविभुत्वेनमृतश
रीरेज्ञानापत्तिवारणंगर्वाणांत्कृणामप्यशक्यमिति चेन्न अवयवोपचयापचयैः शरीरस्यनानात्वेन
पूर्वतद्रूपणावनाशात् पुनःस्मृत्यतो विहतत्वत्यत्वमूर्खत्वदरिद्रत्वादिनियामकंभवंतः किञ्चवते स
सारस्यस्वभावएवायमितिचेदहेपरीत्ये

किंविधायकं अस्तु जन्मसमय एवेति चेन्न तस्मिन्नेव समये जन्मनः समयोगात् अदृष्टस्यैव नियामकं वद न
चास्तीश्वर एव भवन्मते इव नियामक इति वक्तुं शक्यं तस्य समदर्शित्वात् तस्माद् अदृष्टमेव नियामकमिति वाच्यं
तथा च अयमात्मा न मृतदेहमनुपन्नमिति शरीरातिरिक्त एवात्माभ्युपेयः चार्वाकैकदेशिनस्तु काणोऽहं बधिरोऽ
हं जानामीति सामानाधिकरण्यदर्शनादिन्द्रियगण एवात्मेति वदन्ति तच्च बाल्यप्रलपितं चक्षुरादिनाशे यो
ऽहं घटमद्राक्षं सोऽहमिदानीं स्पृशामीत्यभेदप्रतीत्यनुपपत्तेः अपरे तु चार्वाकाः स्वप्ने चक्षुरादीनामप
गमेऽपि मनसा सर्वव्यवहारदर्शनात् तस्य नित्यत्वाच्च तदेवात्मेति मन्यन्ते तदप्यनादरणीयं मनसोऽणुत्वेन सर्वावय
उपलंभप्रसंगात् इतरे चार्वाकाः प्राणेन विना व्यवहारादर्शनात् अन्योऽन्तर आत्मा प्राणमय इति श्रुतिश्च प्राण एवा
त्मेति कल्पयन्ति तदपि न युक्तं तस्यानित्यत्वेन नष्टस्योपदर्शितदूषणावारणप्रहारपातनात् पुत्रे पुष्टे न पुष्टोऽहमे
व पुष्टेन पुष्ट इत्याद्यनुभवात् आत्मा वै जायते पुत्र इति श्रुतेश्च पुत्र एवात्मा इत्यपि केचित् तदपि न तादृशानुभ
वस्याभिमानिकत्वात् उपदर्शितश्रुतीनामात्मनो ज्ञानाधिकरणप्रतिपादनात् सत्यं ज्ञानमिति दृश्यमान
श्रुतिबाध्यत्वात् सर्वं उपेक्षणीयमित्यर्थः दिगंबरास्तु देहातिरिक्तो देहपरिमाण आत्मा स च दीपप्रभावत्संको
चविकाशशालीत्याहुः तदप्यकिंचित्करं तस्यानित्यत्वापत्त्या तच्छिद्रमिश्रवैदिकदोषवज्रप्रहारपातना
त्

।त्व

त. टी.
७
राधा

तो

अतएवतत्वपरिणाकांक्षिणाप्यनुच्यंते इति संक्षेपः इति नास्तिकमतखंडनं अथ सांख्यपातंजलाः आत्ममूलप्रकृतिम
हदहंकारपंचतन्मात्रषोडशविकारभेदात् पंचविंशतितत्वानि तत्र पंचीकरणनिर्लिप्ततागमदसपलाशवत्कर्तृ
त्वभोक्तृत्वादिनिर्लिप्त आत्मा चेतनश्च मूलप्रकृतिस्तु जगत्कर्त्री नित्या जडा च महत्तत्वं च प्रकृतेः परिणामः
प्रकृतिकार्यमितियावत् अहंकारस्तु अहंस्थावी अहंकर्त्तेत्याद्यभिमानः अयं च महत्तत्वस्य कार्यं
तन्मात्राणि शब्दस्पर्शरूपरसगंधाः एतेऽहंकारस्य कार्याणि महदादयः सप्त प्रकृतयो विकृतयोऽपि विका
रास्तु श्रोत्रादिपंचज्ञानेंद्रियाणि वागादिपंचकर्मेंद्रियाणि मनः भूम्यादिपंचभूतानीति षोडश तैर्महाभू
तैः शरीरमुत्पाद्यते तत्संबंधवशात्प्रकृतिरेव सर्वं करोति तत्संसर्गवशादात्मनोऽहंकरोमीत्यभिमानो जा
यते इत्याहुः तदप्यसत् अहं कर्त्ता भोक्ता जानामीति कर्तृत्वभोक्तृत्वचेतनत्वादीनां सामानाधिकरण्य·
प्रतीतेश्चेतनातिरिक्तप्रकृतिसद्भावे मानाभावात् जडायाः प्रकृतेः कर्तृत्वासंभ
वाच्चेति कृतं पल्लवितेन इति सांख्यमतनिरूपणम् पातंजलास्तु
आत्मयोगगम्यः स च चित्तवृत्तिनिरोधः॥

७
कृष्ण

नि

तस्यचित्तस्यबाह्यविषयनिवर्तनादंतरभिनिवेशः यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधि-
भेदादष्टौयोगांगानि नचस्तेयकर्माहिंसाकरुणार्जवक्षमांतिधौचधृतिमिताहारसत्यभाषणाजीवाहिंसनब्रह्म
चर्यभेदाद्दशयमाः आस्तिकतासंतोषतपः स्वार्चनदानलज्जासज्ज्ञानहोमसच्छ्रवणजपभेदाद्दशनियमाः
पद्मासनस्वस्तिकभद्रवज्रवीरासनभेदात्पंचमुख्यासनानि अन्यान्यप्येकोनाशीतिरासनानिसंति रेचकादि
भेदात्प्राणायामस्त्रिधा इंद्रियाणांविषयेभ्योनिवर्तनंप्रत्याहारः अंगुष्ठादिब्रह्मरंध्रांतेतत्स्थानेषुप्राणधार
णंधारणा ततोहृदयादिदेशेशिवस्यध्यानं ततः प्राणान्निरुध्यात्मनासहशिवस्यैक्यभावनेसमाधिः यत्राष्ट
सांगसहितेनयोगेनशिवमयंज्योतिरवलोक्यतेइदमेवसमाधिसिद्धिरित्युच्यते चित्तस्याधिकसाधितस्यतद्वृ
त्तेर्निरोधक्रमादंतर्वृत्तितयोतरेवविगलत्पीयूषमास्वादयेत् स्वात्मन्येव सदाशिवमयंतज्ज्योतिरालो
कयेत् सोऽखंडानंदपरंपरामनुभवेत्सिद्धिः समाधेरियमितिवचनादित्याह इतिपातंजलमतं वेदांतिनस्तु एक
वा मेवाद्वितीयंब्रह्मेतिश्रुतेरेकंब्रह्मैवास्तितच्चाविनाशीवाऽयमात्मासत्यंज्ञानमनंतंब्रह्मेतिश्रुतेर्नित्यंज्ञा
नस्वरूपंचतदेवैकोऽहंबहुस्यामितिश्रुतेरुपाधिवशाज्जीवइत्युच्यते तस्यैवाविद्याविद्याभ्यांबंधमोक्षौभ
वतः देहादावनात्मन्यात्मत्वाभिमानहेतुरविद्याविद्यातुतन्निवर्तिका तस्मिन्नेवब्रह्मणिरज्जौसर्-

पंचिद्वाप्यस्तः संसारो मिथ्यैव भासते तस्माद्ब्रह्मैव सत्यं जगन्मिथ्यैवेति वदंति इदमपि युक्तं नतः प्रतिभाति प्रत्य
क्षादिसिद्धस्य जगतो मिथ्यात्वासंभवात् न च रज्जुसर्पदृष्टांतेपि कथं पदार्थमिथ्यात्वं प्रसिद्धस्यैव सर्पस्य तत्र भानो
त-टी- गीकारेणासत्ख्यात्यनादरणात् अन्यथा शशशृंगादेरपि भानापत्तेः न चास्माभिरनिर्वचनीयख्यातिरभ्युप-
१८ गम्यते नासतः ख्यातिरिति वाच्यं अन्यथाख्यात्यैव निर्वाहे तस्या गौरवपराहतत्वात् अथ तर्हि स्वप्ने कथं
रा धा शास्त्रप्रहारादेर्मिथ्यात्वमिति मा भाषिष्ठाः प्रसिद्धस्यैव शास्त्रप्रहारादेः स्वस्मिन्नारोपमात्रत्वात् अत एव स्वप्नो
मानसविपर्यय इति वक्ष्यामः न च तर्हि मिथ्यात्वप्रतिपादकश्रुत्यादिस्मृतेः का गतिरिति वाच्यं तुच्छाजन्य
भावस्य नश्वरत्वप्रतिपादने तात्पर्यात् अन्यथा वेदस्यापि मिथ्यात्वापत्त्या तत्प्रतिपाद्यब्रह्मणोपि तथात्वापत्त्या ना
स्तिकमतप्रवेशप्रसंगः यदपि नित्यविज्ञानरूपं ब्रह्मेति तदपि न क्षोदक्षमं तथाहि किमात्ममात्रज्ञानरूपं
यद्वा जीवो यद्वेश्वरः नाद्यः यद्यज्ज्ञाने तत्तत्तद्विषयमिति नियमात्तस्यापि कश्चन विषयो वाच्यः स किं या व
ज्जगदिति रूपे किं वा यत्किंचित् घटपटादिकं नाद्यः मेर्वादीनामपि यावदंतर्गतत्वेन मेरुर्मद्विषय इत्यनुभवा
पत्तेः न च निर्विषयमेव तद्रूपं स्वीक्रियत इति भाव्यं निर्विषयकज्ञानत्वे मानाभावात् न द्वितीयः घटस्तद्विष १८
यः पटो वेत्यत्र विनिगमनाविरहेणाभक्षितेपि लशुने नष्टो व्याधिरिति न्यायेन तद्दोषतादवस्थ्यात् राम-
कृष्ण

विनिगमनाचपक तरपुनत्पातिनीयुक्तिः जीवस्यनित्यज्ञानस्वरूपत्वेउपदर्शितदोषवाप्रसं
ग्वात् चैतन्गुणस्याप्यगोकप्रमाणाभावाच्च न चेश्वरस्यापिनत्यात्वसंभवति सत्यं ज्ञानमित्यस्य
वचोनोत्तलक्षणस्यैवज्ञानगुणवदितितदर्थत्वात् अन्तःयः सर्वज्ञः सः सर्वविदितिश्रुतेः प्रामा
णंपनिर्वद्दति जीवब्रह्मणोरैक्यमितियडक्तं तदपिन संगतावदीति सर्वदुःखादिवैचित्र्यात्
जीवानामनेकत्वात् तत्रैकत्वासंभवात् जीवोद्दमीश्वरोनेतिसार्वजनीनप्रतीतेश्च अन्तए
वकश्चनसंसारीबद्धः कश्चनसंसारीमुक्तः इतिव्यवहारउपपद्यते ननेकमेवाद्वितीयंब्रह्मे
तिश्रुतेः कागतिरितिचेन्नात्रैमस्येवाद्वितीयपदार्थत्वात् ननेवंसति सर्वंखल्विदं
ब्रह्मेतिश्रुतेः विरोधइतिचेन्न ब्रह्मेत्यस्यब्रह्मव्याप्तमित्यर्थकत्वात् व्याप्तत्वेसंबद्धत्व-
अन्यथाघटादीनामपिब्रह्मत्वापत्त्याब्रह्मणोऽप्यनित्यत्वापत्तिः घटादीनांनित्यत्वापत्तिर्वा
नचैकोऽहंबहुस्यामितिश्रुतेरप्रामाण्यप्रसंगइतिवाच्यं एकोऽहंनिराकारोब्रह्मशिववे
ष्टरूपेणबहुस्यामितितदर्थकत्वात् तत्त्वमसिब्रह्मविद्ब्रह्मैवभवतीत्यादिश्रुतेर्जीवे

त-सं.टी १९ राधा

स्वरूपयोरभेदप्रतिपादिकायाः श्रुतेः प्रामाण्यमवलम्ब्यतामिति चेन्न तत्त्वमसीत्यस्य निर्दुःखत्वेन तत्स
दृशस्त्वमसीत्यर्थकत्वात् एवं ब्रह्मैव भवतीत्यस्यापि ऐश्वर्याधिक्येन वैश्योयं राजैवेतिवत् अत एव
सर्वे आत्मानः समर्थिताः निरञ्जनः परमं साम्यमुपैतीत्यादिश्रुतिः प्रमाणमामोतिवत्सतः
सर्वेषां श्रुतीनामविरोधेनोपयोगिश्रुतीनामर्थककरणे प्रयोजनाभावइतिसंक्षेपः इत्यात्मनि

सुखाद्युपलब्धिसाधनमिंद्रियंमनः तच्चप्रत्या
त्मनियतत्वादनंतमणुरूपंनित्यं॥ ॥ ॥

रूपणम् मनो निरूपयति सुखेति सुखाद्युपलब्धिः सुखदुःखादिसाक्षात्कारस्तस्य साधनं मन इत्य
र्थः आत्ममनःसंयोगकारणत्वेन्द्रियमिति चक्षुरादिकारणत्वस्य खेति एतेन मनसि प्र
माणं दर्शितं तथाहि सुखदुःखादिसाक्षात्कारः करणसाध्यः जन्यसाक्षात्कारत्वात् चक्षुषा

त.सं.दि.टि.१९

राम. कृ सं २२

नाखदुःखादीनां वाथात्मनः सिध्यति मनो विभज्यते न चेति मनश्चेत्यर्थः तथा चैकैकात्मन एकैकमनस आवश्यक-
त्वेनात्मनामनन्तत्वान्मनसोऽप्यनन्तत्वमिति भावः नन्वाकाशादिवन्मनसो विभुत्वे विभुद्वयसंयोगानङ्गीकारे-
णज्ञानोत्पत्तिर्न स्यात्तज्ज्ञानासमवायिकारणमसिद्धं एतस्मादणु परमाणुरूपमिति परमाणुस्वरूपमित्यर्थः तथा च
मनसोऽणुत्वेनात्मनः संयोगः संभवत्येवेति भावः मीमांसकास्तु मनो विभु स्पर्शरहितद्रव्यत्वादाकाशवदि-
त्यनुमानेन विभुत्वं सिध्यति विभुद्वयसंयोगोऽप्यस्त्येवेति भावः नैतत् तादृशसंयोगस्य नित्यत्वापत्त्या सर्वदा ज्ञा-
नोत्पत्तिप्रसंगेन सुषुप्त्यभावापत्तिः मम तु यदा मनः पुरीतति प्रविशति तदा सुषुप्तिः यदा निःसरति तदा ज्ञानो-
त्पत्तिः पुरीतद्बहिर्देशावच्छिन्नात्ममनःसंयोगस्यैव ज्ञानकारणत्वात् अत एव सुषुप्तिज्ञानानुत्पत्तिवारणाय काले
ज्ञानमात्रे त्वङ्मनःसंयोगः कारणमिति मतं निराकृतं वेदितव्यम् ननु मनसोऽणुत्वेऽष्टावधानिनां कथं युगपज्ज्ञा-
नोत्पत्तिः मनसश्चक्षुरादीन्द्रियसंयोगकाले त्वगिन्द्रियादिना संयोगासंभवादिति चेन्न मनसोऽतिशयवेगशा-
लित्वेन त्वरणविलंबेनैवेन्द्रियसंबंधस्याभ्यासविशेषेणाल्पष्टावधानिनां ज्ञानोत्पादकत्वात् युगपदनु-
भवामीति प्रत्ययो भ्रमः अत एव किमुक्तं व्यासंगान्नज्ञानमित्यनुभवो दरीदृश्यते तथा च न्यायसूत्रे युग-
पज्ज्ञानानुत्पत्तिर्मनसो लिंगमिति मनसोऽनित्यत्वे लाघवं परमाणुरूपत्वाद्वा नित्यमित्याह नित्यं चेति इति
मनोनिरूपणम् अथ द्रव्याणां साधर्म्यवैधर्म्यप्रक्रिया पृथिव्यादिनवानां समवायिकारणत्वं साधर्म्य-

त-कंसी

२. रोधा

नवगुणवायोः तेचरसगंधरूपवर्जंरूपादि द्रवत्वांतासंस्कारश्च

नित्यद्रव्याणामवृत्तित्वं भूजलतेजोवायुमनसांमूर्तत्वंक्रियावत्त्वंवेगवत्त्वंपरत्वापरत्वेचमूर्तत्वंचपरिच्छिन्नप
रिमाणवत्त्वमितिसंप्रदायविदः क्रियासमवायिकारणतावच्छेदकतयासिद्धोजातिविशेषइतिनव्याः आकाशा
दिचतुष्टयस्यविभुत्वंतदेवकिमितिचेत्सर्वमूर्तद्रव्यसंयोगित्वंपरममहत्परिमाणवत्त्वंवादिक्कालमनोभिन्नद्र
व्याणांविशेषगुणवत्त्वंआकाशजीवयोरव्याप्यवृत्तिविशेषगुणवत्त्वं तत्क्षणिकविशेषगुणवत्त्वं वाऽव्याप्यवृत्ति
त्वेनात्मस्वात्यंताभावसमानाधिकरणं पृथिव्यादिपंचानांभूतत्वंतच्चबहिरिंद्रियग्राह्यविशेषगुणवत्त्वमा
त्मावृत्तिविशेषगुणवत्त्वंवा पृथिव्यादिचतुर्णांद्रव्यसमवायिकारणत्वंस्पर्शवत्त्वंच पृथिव्यादित्रयाणांरूप
वत्त्वंद्रवत्वंच पृथिवीजलयोर्गुरुत्वंचवैधर्म्यं पूर्ववद्बोध्यं इदानींपृथिव्यादीनांगुणाःप्रदर्श्यंते तत्ररूपरसगं
धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारश्चेतिचतुर्दशगुणाः पृथिव्याः चतुर्दशगु
णाजलस्यतेचगंधवर्जंरूपादिस्नेहांताः संस्कारश्च एकादशगुणास्तेजसस्तेचरसगंधगुरुत्ववर्जंरूपादिद्रव
त्वांताःसंस्कारश्च षडाकाशगुणाः तेचसंख्यादिविभागांताः शब्दश्चपंचगुणाःकालदिशोः तेचसंख्यादयः
पंच अष्टौगुणाःपरमात्मनः तेचसंख्यादिपंचबुद्धीच्छाप्रयत्नाश्च चतुर्दशगुणाः जीवस्यतेचसंख्यादिपंचबु
द्ध्यादिनवअष्टौगुणामनसः तेचसंख्यादयःसप्तसंस्कारश्च तदुक्तं वायोर्नवैकादशतेजसोगुणाःजलक्षिति
प्राणभृतांचतुर्दश दिक्कालयोःपंचषडेवचांबरेमहेश्वरेष्टौमनसस्तथैवचेति इतिश्रीद्रव्यविशेषनिरूप

३. राम. कृष्ण

पं

अथ गुणान्निरूपयितुं तत्र प्रथमोद्दिष्टं रूपं निरूपयति चक्षुर्मात्रेति रूपत्वादिवारणाय गुणपदं रसादिवारणाय चक्षु
र्ग्राह्येति संख्यादिवारणाय मात्रपदं यद्यपि प्रभाभित्तिसंयोगवारणाय गुणपदेन विशेषगुणस्य विवक्षणीयतया
तत एव संख्यादिवारणं संभवति तथापि सांसिद्धिकद्रवत्ववारणाय तदावश्यकं वस्तुतस्तु परमाणुरूपेऽव्या
प्तिवारणाय चक्षुर्मात्रग्राह्यजातिमत्त्वस्य विवक्षणीयतया विशेषपदं नोदेयं अणुकादिवारणाय गुणपदं तु दे
यं रूपत्वादीनि सर्वाण्येव जातयः रूपं विभजते तच्चेति रूपं चेत्यर्थः उद्देशक्रमविपर्ययेऽनेनान्वेति सप्तविधे

चक्षुर्मात्रग्राह्यो गुणो रूपं तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदा
त्सप्तविधं पृथिवीजलतेजोवृत्ति तत्र पृथिव्यां सप्तविधं अभास्वरशुक्लं जले

द्वेत्वमाह शुक्लेति ननु चित्ररूपे किं मानं चित्रपट इति प्रतीतिस्तत्र गतनीलपीतादीनामेवेति चेन्न तथा सति पटस्याप्रत्य
क्षत्वापत्तेः ननु रूपवत्समवेतत्वमेव बहिरिन्द्रियप्रत्यक्षे कारणं वस्तु प्रकृते रूपवान्न तु तत्समवेतत्वं पटे व्याप्तमेवे
ति चेन्न लाघवेन रूपस्यैव कारणत्वात् अथ व्याप्यवृत्तिनीलपीतादीनां निरुक्तत्वमेव चित्ररूपमस्तु किं मति
रिक्तकल्पनेनेति माऽस्तु गौरवं व्याप्यवृत्तिजातीयगुणानां व्याप्यवृत्तित्वनियमात् किं च तत्तद्गतनीलपीतादीनाम
परस्पराविरोधेनानिरुक्तत्वस्यैवानुपपत्तेः रूपस्याश्रयमाह पृथिवीति आश्रयं विभज्य दर्शयति तत्रेति पृथिव्यादि त्रि

ति
कस्यार्थः अभास्वरशुक्लमिति यमुनासलिलादौ कथं
नीलिमोपलम्भ इति चेत्तत्रस्थस्थलोपाधिकत्वात्

त-र्क-सं-टी

२१

राधा

भास्वरं शुक्लमिति वैश्वानरादावुपष्टंभकपार्थिवरूपप्रतिबंधाद्भास्वरशुक्लानुपलंभः इति रूपनिरूपणं व्यथ रसं नि-
रूपयति रसनेति षड्विध इति अवयवगतनानारससमुदायादेव सामंजस्ये चित्ररसो नानेषणीय इति भावः रसस्याश्रयमा-
ह पृथिवीति आश्रयं विभज्य दर्शयति तत्रेति पृथिवीजलयोरित्यर्थः षड्विध इत्यत्र रस इत्यनुवर्तते जले मधुर एवेति
जंबीररसादावम्लोपलब्धिर्जंबीराद्युपाधिकत्वा आमलभेतादौ नाजले माधुर्यव्यंजकत्वमेवेति बोध्यं इति र-
सनिरूपणं गंधं निरूपयति घ्राणेति पृथिवीमात्रवृत्तिरिति गंधवत्तीति सत्त्वे पृथिवीसंबंधसत्त्वे पृथिवीसंबंधा-

भास्वरशुक्लं तेजसि रसनाग्राह्यो गुणो रसः स च मधुराम्ललवणकटुकषायतिक्तभेदात्षड्विधः पृथिवीजल-
वृत्तिः तत्र पृथिव्यां षड्विधः जले मधुर एव घ्राणग्राह्यो गुणो गंधः स द्विविधः सुरभिरसुरभिश्च पृथिवीमात्रवृत्तिः
त्वगिंद्रियमात्रग्राह्यो गुणः स्पर्शः स च त्रिविधः शीतोष्णानुष्णाशीतभेदात् तत्र शीतो जले उष्णस्तेजसि अनुष्णाशी-
तः पृथिवीवाय्वोः

भावे गंधप्रतीत्यभावः इत्यन्वयव्यतिरेकाभ्यां पृथिवीगंधस्यैव जले प्रतीतिर्बोध्या एवं वायावपि ननु देशांतरस्थ-
कस्तूरीकुसुमसंबद्धपवनस्येतद्देशेन तत्संबंधाभावाद्गंधवत्त्वप्रत्युत्पत्तिः न च वायोरानीतत्र्यणुकादिसंबंधोस्त्येवेति
वाच्यं कस्तूर्याः न्यूनतापत्तिः कुसुमस्य च सच्छिद्रतापत्तिरिति चेन्न भोक्तृदृष्टविशेषेण त्र्यणुकाद्युत्पत्तिः कस्तूर्या-
दौ न्यूनत्वाद्यभावान्न तथा इति गंधनिरूपणं स्पर्शं लक्षयति त्वगिति संख्यादिवारणाय मात्रपदं तत्रेति पृथिव्यादि च-

राम.

२१

कृष्ण

प्रसंगाद्रूपादिचतुष्टयस्य पाकजत्वं पाकजत्वे प्रतिपादयन्नित्यत्वानित्यत्वे प्रतिपादयति रूपादीति। पाकजं।
पाकजमपीत्यर्थः पाकस्तेजःसंयोगः पाकात्समवायिकारणामित्यर्थः ननु कथं पाकाज्जन्येति चेदत्र पील
पाकवादिनो वैशेषिकाः आमे निहितमेव घटे नाशानसंयोगात्परमाण्वादिकपालपर्यंतावयवेषु क्रिया ततः
परस्परविभागः ततः परस्परसंयोगनाशः ततोऽसमवायिकारणनाशात् द्व्यणुकनाश इति न्यायेन श्यामघटनाशे
विशिष्टाः परमाणवः पच्यन्ते तत्र पाकेन रूपादिचतुष्टयोत्पत्तिः ततः परमेश्वरेच्छासंयोगादाविद्व्यणुकादि
क्रमेण सर्वं रक्तघटो निर्मीयते परमाणुरूपेण द्व्यणुकरूपं जन्यते एवं क्रमः अन्यथा घटस्य रक्तत्वे न
रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं अन्यत्रापाकजं नित्यमनित्यं च नित्यगतं नित्यं अनित्यगतमनित्यम्
ता शान प्रदेशासंभवादंतरा रूपाद्युत्पत्तिर्न स्यादित्याहुः पिठरपाकवादिनो नैयायिकास्तु घटादिके सच्छिद्रमे
व अन्यथा तेजसोऽन्तर्गततंडुलादेः पाको न स्यात् अत एकदैव परमाण्वादिघटपर्यंतेषु नाशं विनैव रूपाद्युत्पत्ति
रिति वदंतीति संग्रहः ननु स्पर्शः कथं पाकज इति चेन्न रसालफलादावातपादिना कोमलकठिनस्पर्शोत्पा
दनस्य प्रत्यक्षसिद्धत्वात् केचित्तु अवयवसंयोगविशेष एव काठिन्यादिरित्याहुः तदसत् तथा सति तस्य चाक्षुष
त्वापत्तेः स्पर्शनसंयोगस्य चाक्षुषत्वनियमात् पाकजत्वादनित्यमित्याह अनित्यं चेति अन्यत्र जलादौ नित्य
र्थः अपाकजमेवेत्यर्थः इति पाकवादः ॥

त॰ दी॰
२२
राधा

संख्यां निरूपयति एकत्वादीति एकत्वमित्यादिर्यो व्यवहारः एको द्वावित्यात्मकस्तस्य हेतुः संख्येत्यर्थः ननु सं-
ख्याया अवधिः कुत्र वेत्यत आह एकत्वादीति तथा च एकं दश शतं चैव सहस्रमयुतं तथा लक्षं च नियुतं चैव कोटि-
रर्बुदमेव च वृन्दं खर्वो निखर्वश्च शंखः पद्मश्च सागरः अन्त्यं मध्यं परार्धं च दशवृद्ध्या यथाक्रममिति मद्दङ्क्तेः परा-
र्धपर्यन्तैव संख्येति भावः नित्यत्वानित्यत्वभेदेनैकत्वं द्विविधमाह नित्यगतमिति नित्यगतं गगनपरमाण्वादि-
गतमनित्यगतं परमाणुभिन्नपृथिव्यादिचतुष्टयगतमित्यर्थः द्वित्वादिकमिति आदिना त्रित्वादिग्रहणं सर्वत्रे-
ति नित्यानित्यद्रव्ययोरित्यर्थः तच्चापेक्षाबुद्धिजन्यत्वाद्द्वित्वादिकमनित्यमेवेति भावः ननु कथमपेक्षाबुद्धिजन्यत्व-

एकत्वादिव्यवहारहेतुः संख्या नवद्रव्यवृत्तिः एकत्वादिपरार्धपर्यन्ता एकत्वं नित्यगतं नित्यमनित्यगतमनित्यं द्वि-
त्वादिकं सर्वत्रानित्यमेव मानव्यवहारासाधारणं परिमाणं नवद्रव्यवृत्ति

मिति चेदाकर्णय चक्षुर्द्वयसन्निकर्षानन्त-
रमयमेकोऽयमेक इति ज्ञानं जायते ततोऽयमेवापेक्षाबुद्धिनिमित्तकारणं घटद्वये समवेतं द्वित्वमुत्पाद्यते तच्च घटद्वयगतमे-
कत्वमसमवायिकारणं अपेक्षाबुद्धिनिमित्तकारणं ततो द्वित्वादेः निर्विकल्पकं ततः इमौ द्वाविति द्वित्वविशिष्टप्रत्यक्ष-
तन्निर्वाहार्थमेवापेक्षामतेस्त्रिक्षणावस्थायित्वं कल्प्यते तस्मिन्नेव क्षणेऽपेक्षाबुद्धेर्नाशः तदुत्तरक्षणे च द्वित्वस्य नाश-
स्तत्रापेक्षामतिनाशः कारणं एवं त्रित्वादावपि बोध्यं अतीन्द्रियद्वित्वादिकं तु योगीश्वरापेक्षाबुद्ध्या जन्यते तन्नाशा-
पि तन्नाशादेव ननु शब्दबुद्धिकर्मादीनां द्वित्वक्षणावस्थायित्वात्कथमपेक्षाबुद्धिस्त्रिक्षणावस्थायिनीति-
चेन्मैवं सर्वत्र नैतादृशनियमो गौरवात् इति संख्यां परिमाणं निरूपयति मानेति माने परिमितिः तस्य यो व्यवहारः

५ महदिदमतिविनाशाल्लकक्षकसकालां परिमाणोत्पत्तिः तस्याप्रथम
८ नवेति तदिति नित्यगतं नित्यमनित्यगतमनित्यं ॥

राम॰
२२
कृष्ण

शिवा
निरूपयति

परिमाणं विभजते नचेति चतुर्विधमपि परममध्यभेदेन द्विधा तत्र परममहत्त्वं ह्रस्वत्वं च परमाणुमनसोः मध्यमं
तत्र द्व्यणुके परमं महत्त्वं दीर्घत्वं गगनादौ मध्यमं तत्पटादौ पटत्मौक्तिकादिके मौक्तिकमणिवन्निव्यवहारस्याप
कृष्टमहत्त्वाज्ञेयोणत्वं बोध्यं एवं केचन नाद्यजन्यं ह्रस्वमित्याचापिनिकृष्टदीर्घत्वं परिमाणे क्वचित्संख्याजन्यं क्वापि
परिमाणजन्यं क्वचन प्रचयात्क्वचित्संयोगजन्यं तत्राद्यं परमाणुद्वित्वजन्यं द्व्यणुके द्व्यणुकत्रित्वजन्यं च त्र्यणुके द्वि
तीयं कपालादिपरिमाणजं घटादौ तृतीयं तूलावयवसंयोगजं तूलपिंडपरिमाणं प्रथममेव संयोगः पौष्कल्यमि
त्युच्यते इति परिमाणनिरूपणं पृथक्त्वं लक्षयति पृथगिति अयमस्मात्पृथगिति यो व्यवहारस्तस्य कारणं पृ

न त्ववविधं अणुमहद्दीर्घह्रस्वं चेति पृथग्व्यवहारासाधारणं कारणं पृथक्त्वं सर्वद्रव्यवृत्ति संयुक्तव्यवहा
रहेतुः संयोगः सर्वद्रव्यवृत्तिः ॥ पृथक्त्वमित्यर्थः नन्वेकपृथक्त्वं द्विपृथक्त्वं त्रिपृथक्त्वादिभेदेन बहुविधं तच्चै

कपृथक्त्वं नित्यगतं नित्यमनित्यगतमनित्यं द्विपृथक्त्वादिकं तु सर्वत्रानित्यमेव नन्वन्योन्याभावादतिरिक्तं पृथक्त्वस
द्भावे किं मानमिति चेन्न घटः पटो नेति प्रतीतिविलक्षणायाः घटात्पटः पृथगिति प्रतीतेरेव मानत्वात् इति पृथक्त्व
निरूपणं संयोगं निरूपयति संयुक्ताविति इमौ संयुक्ताविति यो व्यवहारस्तस्य हेतुः संयोग इत्यर्थः उपदर्शित
लक्षणे चतुष्टये असाधारणपदं देयं क्वचित्तु स्वके परिमाण पृथक्त्व लक्षणे असाधारणपदं दत्तं एतेन तत्साधु
निकेऽव्याप्तमिति बोध्यं संयोगस्त्रिविधः अन्यतरकर्मजोभयकर्मजसंयोगजभेदात् तत्राद्यः शकुनशैलसं

संयोगः द्विविधोभयकर्मजोऽन्यतरकर्मजः कार्यकारणसंयोगजसंयोगः ...
... अवयवसंयोगात् ... कारणाकारणसंयोगात् कार्याकार्यसंयोगः
... संयोगः

बहुव

विभा

विभागंनिरूपयति संयोगेति संयोगनाशजनकइत्यर्थः कालेऽतिव्याप्तिवारणायगुणपदंनन्वेवंरूपस्येच्छायामति
नत व्याप्तिः यथा[illegible]धारणाजनकेऽपिवदितिस्तद्वारणायदस्यैववैयर्थ्यंस्यादितिचेन्नैवं क्रियायामतिव्याप्तिवारणा
यतस्यावश्यकत्वात् क्रियाक्रियातोविभागोविभागात्पूर्वसंयोगनाशस्ततउत्तरदेशसंयोगोत्पत्तिरितिनियमे
२१ नक्रियायाअपिजनकत्वात् नत्वपयोः संयोगस्यैवेवविभागइतिनियमात्तत्कैकालसोविभक्तावितिव्यवहा
राधा रःकथमितिचेन्न तस्यगौणत्वात्तविभागे[illegible]लानौविभक्तावितिव्यवहारः पित्रियासुर्वेवनतउदा
हरणमपिपूर्ववदेवाध्यंविभागजविभागोद्विधाकारणमात्रविभागजः कारणाकारणविभागजश्चतत्राद्यःकपाल जः १

संयोगनाशकोगुणोविभागः नवद्रव्यवृत्तिः परापरव्यवहारासाधारणकारणेपरत्वापरत्वेतिद्विविधे दिक्कृ
तेकालकृतेचेति दूरस्थेदिक्कृतंपरत्वं समीपस्थेदिक्कृतमपरत्वं ज्येष्ठेकालकृतंपरत्वं कनिष्ठेकालकृतमपर त्व
घ८१५ हस्तविभागात् [illegible] पूर्वदेशविभागः द्वितीयः हस्तपुस्तकविभागात्कायपुस्तकविभागः तस्याप्यप्रमाद
नवेति इतिविभागंनिरूपणं [illegible]परत्वापरत्वेनिरूपयति परापरेति परव्यवहारासाधारणंकारणं
२५ परत्वमपरव्यवहारासाधारणमपरत्वमित्यर्थः तत्रतिद्वैविध्यमुत्पादयति दिगिति दैशिकंकालिकंचेत्यर्थः तत्र
दैशिकपरत्वमुदाहरति दूरस्थइति तदुत्पत्तिक्रमस्तुभिदितपरावृत्तादिकपिंडसंयोगोसमवायिकारणशेषसंयोगम
मे दैशिकमपरत्वमुदाहरति समीपइति तदुत्पत्तिस्त्वल्पतरमूर्तसंयोगविषयीभूतशरीरज्ञानात् दैशिकपरत्वापरत्वे
मूर्तमात्रवृत्तिनीभवतः कालिकपरत्वमुदाहरति ज्येष्ठइति अत्रकालपिंडसंयोगासमवायिकारणंकालिकमपर

ज्येष्ठे कनिष्ठ इति कनिष्ठत्वं कालिकमपरत्वं तत्र कालिकप्रत्यासत्त्या द्विवा कदाचित् परत्वाविशिष्टरूपीज्ञानात् कालिकपरत्वापरत्वे जनयत इत्यर्थः ॥

परत्वापरत्वेविभजते ५४

द्रव्यत्व २

गुरुत्वं दर्शयति आद्येति आद्यं यत्पतनं नेकर्मविशेषस्तस्यासमवायिकारणं गुरुत्वं द्वितीयादिपतनासमवायिनि वेगे तिव्या
प्तिवारणायाद्येति न च रक्तिकमाषकतोलादिभेदेनानेकधा नित्यगतं नित्यमनित्यगतमनित्यं चेति द्रवत्वं लक्षयति
स्यन्दनेत्यवयवान्तरसमवायि द्रवत्वं तेन दाश्रयमाह पृथिवीति न च जलपरमाणुभिन्नेः नित्यमिति बाध्यं विभजते नैमित्तिके सा
ंसिद्धिके तेजःसंयोगजन्यं नैमित्तिकमित्यर्थः ननु नैमित्तिकद्रवत्वस्य पृथिव्यां घटादौ तेजसि वत्सादौ
चाभावात्कथं पृथिवीतेजसोरित्युक्तं तत्राह पृथिव्यामिति स्नेहलक्षणमाह चूर्णेति चूर्णापिष्टं तदेवादिर्यस्य सक्तुका
देः तद्धूर्णादिस्तस्य पिण्डीभावः संयोगविशेषस्तस्य हेतुर्निमित्तकारणं स्नेहइत्यर्थः कालादावतिव्याप्तिवारणाय गु

आद्यपतनासमवायिकारणं गुरुत्वं पृथिवीजलवृत्ति स्यन्दनासमवायिकारणं द्रवत्वं पृथिव्यप्तेजोवृत्ति तद्द्वि
विधं सांसिद्धिकं नैमित्तिकं च सांसिद्धिकं जले नैमित्तिकं पृथिवीतेजसोः पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वं
तेजसि सुवर्णादौ चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः जलमात्रवृत्तिः श्रोत्रग्राह्यो गुणः शब्दः ॥ ॥ ॥ ॥

णपदं रूपादावतिव्याप्तिवारणाय पिण्डीभावेति चूर्णपदं स्पष्टार्थं स च नित्यगतो नित्यः तैलादावन्तर्गतजलभागस्यैव स्ने
हः इति नातिव्याप्तिः इति स्नेहं निरूपयति श्रोत्रेति शब्दत्वेतिव्याप्तिवारणाय गुणाइति वस्तुतस्तु श्रोत्रोत्पन्नशब्द
स्यैव श्रोत्रग्राह्यत्वेन न तद्भिन्ने व्याप्तिवारणाय श्रोत्रग्राह्यजातिमत्त्वं तात्पर्यार्थः कर्णादेशमनुप्राप्तस्यैव ग्रहणं भेर्याद्य
वच्छेदेनोत्पन्नशब्दस्य कथं श्रोत्रदेशोत्पत्तिरिति चेन्न वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन तदुत्पत्तेः भेरीण
द्योमयाश्रुतइति धीस्तु भ्रान्तिरेव अत एव भेरीजन्यजातशब्दान्मया मेदशब्दस्ताद्दृशः श्रुतइत्यनुभवः सोपि विह

तर्क
२४
राधा

तन्मतनिरासार्थमाह आकाशमात्रवृत्तिरिति तत्रयुक्तिंप्रदर्शितैव शब्दंविभजते सइति भेर्यादौतदवच्छेदेनेत्यर्थः आकाशेजायमानइतिशेषः आदिनावेणुवीणामृदंगादिपरिग्रहः वर्णात्मकमुदाहरति वर्णात्मकइति संस्कृतभाषादिरूपइतिशेषः अत्रादिपदेनलौकिकभाषापरिग्रहः द्विविधोपिशब्दस्त्रिविधः संयोगजोविभागजोशब्दजश्च तत्राद्योभेरीदंडसंयोगात्तद्ध्वन्यात्मकः कंठसंयोगाद्वर्णात्मकः द्वितीयश्चवंशेपाट्यमानेदलद्वयविभागात्ध्वन्यात्मकः सचचटचटाशब्दः डोष्ठद्वयविभागाद्वर्णात्मकः सचपकारादिः तृतीयश्चद्वितीयशब्दात्तृतीयशब्दात् शब्दः अत्रसर्वत्राकाशः समवायिकारणं भेर्याकाशसंयोगः कंठाकाशसंयोगः वंशादल

आकाशमात्रवृत्तिः सहिद्विविधोध्वन्यात्मकोवर्णात्मकश्चेतिध्वन्यात्मकोभेर्यादौवर्णात्मकः संस्कृत भाषादिरूपः

काशविभागः डोष्ठाकाशविभागः शब्दश्च असमवायिकारणंअन्यत्सर्वंनिमित्तकारणं

तदुक्तं संयोगाद्विभागाच्चशब्दाच्चशब्दनिष्पत्तिरिति तन्नाशश्चान्तरोत्तरशब्देन योग्यविभुविशेषगुणानां प्रतिस्वोत्तरवृत्तिगुणनाशकत्वात अन्त्यशब्दनाशस्तूपांत्यनाशेन केचित्तु संदेप्रसंदन्यायेनोपान्त्यशब्दस्यान्त्यशब्देनांत्यस्योपांत्येननाशइत्याहुः तच्चेनसंभवति अन्त्यशब्दनाशस्वव्यक्तौउपांत्यस्याभावस्यैव नष्टत्वेनतत्स्यकारणत्वासंभवात ननुनैमनीयासौयगकारइतिप्रत्यभिज्ञावलात्वकुत्रास्यनित्यत्वमाहुः स्मत्कथमनित्यत्वमुपपादितमितिचेन्नतदेवेदमौषधमितिप्रतीतिवत्तत्स्याप्रपिसाजात्यावलंबनीयत्वात् अतएवात्वंनोगकारो

रा म
२४
कृष्ण

नैयायिकानांमतेशब्दःसमवायिकारणमाकाशम्ः

३

बुद्धिं लक्षयति सर्वेति सर्वे [redacted]
[redacted] ये व्यवहारा आहारविहारादयस्तेषां हेतुर्बुद्धिरित्यर्थः सांख्यमते बुद्धेरंतःकरणात्मकत्वं तन्निरस्यति ज्ञान
मिति तथा च मनोभिन्नांतःकरणे मानाभावः अथवा बुद्धिशब्दस्यायं बुद्धिमानित्यत्र ज्ञानविशेषे व्यवहारदर्शना
त्किं ज्ञानविशेषो बुद्धिरत आह ज्ञानमिति तथा च ज्ञानसामान्यं बुद्धिरित्यर्थः तां विभजते सेति द्वैविध्यमुक्त्वा द्वय
ति स्मृतिरिति स्मृतेर्लक्षणमाह संस्कारेति संस्कारध्वंसेति व्यभिचारवारणाय संस्कारमात्रजन्यत्वं विवक्षणीयं क:

सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानं सा द्विधा स्मृतिरनुभवश्च संस्कारजन्यं ज्ञानं स्मृतिः तद्भिन्नं
ज्ञानमनुभवः स द्विविधो यथार्थोऽयथार्थश्च [illegible] तद्वति तत्प्रकारकानुभवः ॥ ॥

[illegible]

चिन्त्यैव पाठः न चैवमत्यसंभवः तस्य संस्कारजन्यत्वेऽस्मृतित्वं इन्द्रियार्थसन्निकर्षजन्यार्थकत्वात्स्मृतित्वं च स
मीत्यनुभवसिद्धो जातिविशेषः इति स्मृतिनिरूपणे अनुभवामीत्यनुभवसिद्धमनुभवत्वमपत्यत्तजातिरेव
नत्वनुमित्यादिसाधारणं तत्त्वं तच्चताहशमत्ययाभावादतोऽनुभवत्वं निर्वक्ति तद्भिन्नमिति स्मृतित्वावच्छिन्नभि
न्नमित्यर्थः तेन यत्किंचित्स्मृतिभिन्नत्वस्य स्मृतौ सत्वेऽपि न क्षतिः घटादिवारणाय ज्ञानमिति स्मृतिवारणाय
तद्भिन्नमिति इत्यनुभवसामान्यनिरूपणे अनुभवं विभजते स इति यथार्थोऽनुभवं लक्षयति तद्वतीति

अनुभवत्वादि [illegible]

तद्वति तत्तदेव प्रकारो यस्य स तथैवेत्यर्थः ॥

मिति ३५

तद्वद्विशेष्यकं तत्प्रकारकं इति यावत् भवति चायं घट इति ज्ञानं घटत्ववद्घटविशेष्यकं घटत्वप्रकारकं च
स्मृतिवारणायानुभव इति अयथार्थानुभववारणाय तद्वतीति यथार्थ इति अनुभव इत्यनुषज्यते घटे
त दी॰ घटो न वेति संशयोपि घटत्वांशे प्रमैव ननु रजते रजतत्वप्रमायामव्याप्तिः तस्याः रजतप्रकारकत्वे
२५ पि विशेष्यीभूतरजतत्वे रजतस्यासत्त्वेन रजतवद्विशेष्यत्वाभावादिति चेत् न तद्वति तत्प्रकारकत्वमित्यस्य
राधा तत्संबंधवति तत्प्रकारकत्वमित्यर्थस्य संग्रामः रजतत्वे रजतस्यासत्त्वेपि रजतसंबंधवति रजतत्वे रज
तप्रकारकत्वेन तादृशप्रमायामव्याप्ततमेव ननु प्रमा स्वेप्रमापि सूच्यते सा यथार्थानुभवात्मिका बुद्धिरेव किं
प्या

यथार्थः सैव प्रमेत्युच्यते तदभाववति तत्प्रकारकश्चायथार्थः

वा तदतिरिक्तेत्याशंका निरस्यति सैवेति या यथार्थानुभवात्मिका बुद्धिः सैव प्रमेत्युच्यते नान्येति भावः
पी॰ २ अयथार्थानुभवं लक्षयति तदभाववतीति तदभाववद्विशेष्यकस्तत्प्रकारकोनुभवः अयथार्थानुभव इत्यर्थः
यथा शुक्तौ इदं रजतमिति ज्ञानं भवति हि रजतत्वाभाववच्छुक्तिविशेष्यकं रजतत्वप्रकारकं च ननु वृक्षः
कपिसंयोगीति प्रमायामतिव्याप्तिः तस्यावच्छेदेन कपिसंयोगाभाववति वृक्षे कपिसंयोगप्रकारकत्वादिति कृष्ण राम
चेन्न तदभावावच्छेदकावच्छेदेन तत्प्रकारकत्वमिति तदर्थत्वात् तादृशप्रमायाः कपिसंयोगाभावविच्छेदकी २५
भूतमूलावच्छेदेन कपिसंयोगप्रकारत्वाभावेन नातिव्याप्तिविरहात् अत्र मीमांसकाः ॥ ॥

मूला ३५

अयथार्थानुभवएवाप्रसिद्धः न च तस्याप्रसिद्धत्वे कथं तद्भिन्नत्वेन रजते प्रकारकाविसंवादीच्छया रजतार्थि
नोविसंवादिप्रवृत्तिरितिवाच्यं पुरोवर्तिज्ञानरजतत्वस्मरणाभ्यामेवतत्संभवादित्याहुः इदमकिंचित्करं ॥
तथासतिनेदंरजतमितिवाक्यज्ञानादपितदापत्तेः उपस्थितेष्टभेदज्ञानाभावएवाविसंवादिप्रवृत्तौबीजमि
तिचेन्न सत्यरजतस्थलेविशिष्टज्ञानस्यैवप्रवर्तकत्वस्य प्रामाणिकत्वेन लाघवात्तस्यैवसर्वत्र प्रवर्तकत्वौ
चित्यादित्यन्यथाख्यातिसिद्धिः वाचस्पतिमिश्रास्तु शुक्ताविदंरजतमितिज्ञाने प्रसिद्धशुक्तिरजतत्व
योरलीकएवसमवायोविषयइत्यसत्ख्यातिमंगीचक्रुः तन्नयुक्तं असतोभानासंभवात् इत्ययथार्थानु
भवसामान्यनिरूपणं यथार्थानुभवंविभजते यथार्थानुभवइति यथार्थानुभवः प्रत्यक्षमेवेति
चार्वाकाः अनुमितिरपीति कणादबौद्धाः उपमितिरपीति नैयायिकैकदेशिनः शाब्दमपीति नैयायिकाः ८
अर्थापत्तिरपीति प्राभाकराः अनुपलब्धिरपीति भाट्टवेदांतिनः यथार्थानुभवश्चतुर्विधः प्रत्यक्षानुमि
त्युपमितिशाब्दभेदात् तत्करणमपिचतुर्विधं संभवैतिह्यकावपीतिपौराणिकाः चैष्टिकोपी
तितांत्रिकाः एतेषांमते अस्वरसात्तस्यचातुर्विध्यंस्वयंदर्शितं अस्वरसबीजंतुस्पष्टीभविष्यति चातु
र्विध्येहेतुमाहप्रत्यक्षेति इतिप्रमाविभागः प्रसंगात्प्रमाकरणं विभजते तत्करणमिति यथार्थानुभ
वात्मकप्रमायाः करणमित्यर्थः ॥

च३५

त दी. प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्षणं अनधिगतार्थगन्तृ प्रमाणमिति मीमांसकास्तदसत् एकस्मिन्नेव घटे घटोऽयं घटोऽयमिति धारावाहिकप्रत्यक्षस्थलेऽधिगतार्थगन्तृत्वेनाप्रमाणत्वापत्तेः चातुर्विध्यं दर्शयति प्रत्य

२९ क्षेति नैयायिकमते प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति इति प्रमाणविभागः प्रमाणज्ञानस्य करण-
राधा ज्ञानाधीनत्वात् करणं निर्वक्ति असाधारणं कारणमिति असाधारणत्वं च फलायोगव्यवच्छिन्नकारणं
करणमिति मते फलायोगव्यवच्छिन्नकारणत्वं [illegible] कारणत्वं व्यापारवत्कारणं करणमिति मते फलयोग-
व व्यवच्छिन्नलक्षणव्यापारवत्त्वं व्यापारश्च द्रव्यान्यत्वे सति तज्जन्यत्वे सति तज्जन्यजनकत्वं करणत्वस्य कारणत्वघटितत्वात् कारणं विवेचयति

प्रत्यक्षानुमानोपमानशब्दभेदात् असाधारणं कारणं करणं अनन्यथासिद्धकार्यनियतपूर्ववृत्तिका
रणं कार्यं प्रागभावप्रतियोगि तत्कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात् ॥ ॥ ॥ ॥

नी वा
ति कार्येति कार्यान्नियततया व्यवधानेन पूर्वभाविनि पूर्ववृत्तिः सर्वदा पूर्ववृत्तिर्यस्य तत्तथेत्यर्थः अनियततरासभादिवारणाय नि
यतेति कार्यं वारणाय पूर्वेति अन्यथा घटरूपस्य दण्डेऽपि स्वप्रागभावप्रतियोगित्वसत्त्वात् घटकारणत्वानिर्वाहः स्वरूपयोग्यत्वं च
कारणतावच्छेदकधर्मवत्त्वं प्रकृते दण्डत्वमेव तथा दण्डत्वदण्डरूपादिवारणायानन्यथासिद्धविशेषणात्वस्या सम
वश्यकत्वेन ततएव रासभादिवारणसंभवे नियतपदमनर्थकं एवं चानन्यथासिद्धपूर्ववृत्तिकारणमिति फ २९
लितं नतु कार्यमेव किमित्याकाङ्क्षायामाह कार्येति अनन्यथासिद्धत्वमन्यथासिद्धिशून्यत्वं अन्यथा-
दं

सिद्धिश्चावश्यकॢप्तमनियतपूर्ववर्त्तिनएवकार्य्यसंभवेनतत्सहभूतत्वेयथावश्यकॢप्तमनियतपूर्ववर्त्तिभिर्दंडा
दिभिरेवघटरूपकार्य्यसंभवेततत् सहभूतत्वंदंडत्वादौनतत्तदन्यथासिद्धं केचित्तु अन्यत्रकॢप्तमनियतपूर्व
वर्त्तिनएवकार्य्यसंभवेतद्भिन्नमन्यथासिद्धं यथारूपप्रागभावस्यान्यस्थलेकॢप्तमनियतपूर्ववर्त्तिनोगंधप्राग
भावादेवपाकजस्थलेपिगंधरूपकार्य्यसंभवेपितद्भिन्नरूपप्रागभावोगंधप्रागभावेनान्यथासिद्धइ
तिवदंति तदसत् दंडत्वादेरन्यथासिद्धत्वानापत्तेः अथदंडएवान्यथासिद्धः किन्नस्यादितिचेन्न तस्य
लाघवेनकारणत्वात् तल्लाघवंत्रिधाशरीरकृतमुपस्थितिकृतंसंबंधकृतंचतत्राद्यंअन्यपदेनेकद्र
व्यत्वापेक्षयामहत्वेअनेकावयवद्रव्यजन्यत्वे अनेकद्रव्यत्वमनेकावयवत्वंपारिमांडिल्याभावविशि
ष्टद्रव्यत्वे द्वितीयंगंधप्रागभावे तृतीयंदंडत्वापेक्षया साक्षात्संबंधकृतंदंडत्वमपहृत्य विचारेण न
नुपंचम्यन्यथासिद्धिरेवकुतः प्रदर्शिताअन्याअपिचतस्रः संति तत्राद्यात्त येनरूपेण पूर्ववृत्तित्वंकारण
स्यतदन्यथासिद्धंयथाघटंप्रतिदंडत्वस्य द्वितीयाच यस्यकारणमादायैवान्वयव्यतिरेकौगृह्येतेनतस्मा
त्कारणत्वेयथाघटंप्रतिदंडरूपस्य तृतीयाच यस्यान्यंप्रतिपूर्ववर्तित्वंगृहीत्वैवकस्यचित्पूर्ववर्त्तित्वंगृह्यतेतत
त्वेयथाघटंप्रतिनभसः शब्दसमवायकारणत्वेनरूपेण चतुर्थीच यस्यकारणंप्रतिपूर्ववर्त्तित्वंगृहीत्वैव
कार्य्यंप्रतिपूर्ववर्त्तित्वंगृह्यतेतत्त्वेयथाघटंप्रतिकुलालपितृत्वेनरूपेणकुलालपितुः कुलालत्वेनरूपे

।।तत्कारणत्वस्य स्वरूपसंबन्धेन पंचम्या अन्यथासिद्धिरेव सर्वत्र संभवेन
नायमतिरिक्तसिद्धिर्विनाकारणात्।।

म२४

त.टी. २७ ख

बालबुद्धिवैशद्यार्थमेवस्त्विति चेत्स्यादेतत् यत्समवेतमिति यस्मिन्समवायसंबंधेनवर्तमानं स्यादिति भावः
उदाहरति यथातंतवइति स्वगतरूपादेरित्यत्रादिनागंधादेः परिग्रहः ननुपटरूपंप्रतितंतुरूपंसमवायि
कारणंनयुक्तं तयोः सामानाधिकरण्याभावात् समानाधिकरणयोरेवकार्यकारणभावनियमादतआह
कारणेनेति कार्येणसमवायिकारणेनेवेत्यर्थः तथाचपटरूपकारणीभूतपटसामानाधिकरण्यस्यतंतु
रूपेसत्वात्परंपरासंबंधेनपटरूपसामानाधिकरण्यमपिसुलभमेवेतिभावः परंपरासंबंधश्चस्वसमवायि

यत्समवेतंकार्यमुत्पद्यतेतत्समवायिकारणं यथातंतवःपटस्यपटश्चस्वगतरूपादेः कार्येण
कारणेनवासहैकस्मिन्नर्थेसमवेतत्वेसतिकारणमसमवायिकारणं यथातंतुसंयोगःपटस्य
तंतुरूपंपटरूपस्य ॥

समवायसंबंधेनकार्यसामानाधिकरण्यमेवकार्येकार्यप्रत्यासत्तिरित्युच्यते स्वसमवायिसमवायसंबं
धेनकार्यसामानाधिकरण्यमेवकारणेकार्थप्रत्यासन्निरित्युच्यते तथाचसमवायस्वसमवायिसम
वायान्यतरसंबंधेनकार्येणसहैकस्मिन्नर्थेसमवायेनप्रत्यासन्नत्वेसति आत्मविशेषगुणान्यत्वेस
तिकारणमसमवायिकारणमितिफलितोर्थः नचतुरीतंतुसंयोगादावतिव्याप्तिरितिवाच्यं तंतुमात्रसमवेत

त्वे सति पटासमवायिकारणमिति विशेषणदलं ले।
कारण
विवक्षितत्वात् ॥

ख. २७

एवमन्यत्रापि निमित्तकारणं लक्षयति तदुभयमिति । इदं च कारणत्रयं भावकार्यस्यैव अभावस्य तु निमि-
त्तमात्रं कारणं लक्षणमुपसंहरति तदिति । यस्मात्कारणात्कारणत्रयघटकं कारणमुपदर्शितं तस्मादेतत्त्रिविध-
कसाधकमध्ये यत्साधकं तदेव करणमिति भावः इति कारणप्रपंचः अथ प्रत्यक्षप्रक्रियां करणप्रपंचं निरू-
प्य सर्वोद्दिष्टप्रमाणविशेषाणां लक्षणं वक्तुमुपक्रमते तत्रेति तत्र प्रमाणचतुष्टयमध्ये प्रत्यक्षज्ञानका-
रणं साक्षात्कारिप्रमाकरणं प्रत्यक्षप्रमाणमित्यर्थः अनुमानादिवारणाय प्रत्यक्षेति यद्यपि प्र-
त्यक्षादिप्रमायाः प्रथमोद्दिष्टत्वात्तस्या एवादौ लक्षणं वक्तुमुचितं तथापि तस्याः प्रमाणोपजीवकत्वे-

तदुभयभिन्नं कारणं निमित्तकारणं यथा तुरीवेमादिकं पटस्य तदेतत्त्रिविधकारणमध्ये यदसाधारणं का-
रणं तदेव करणं तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षं ।

न तदुपजीव्यप्रमाणलक्षणमेवादावुचितमिति भावः

तत्र क्वचिदिन्द्रियेणार्थेन्द्रियसन्निकर्षः करणं तज्ज्ञाने तत्राद्यं निर्विकल्पकज्ञाने द्वितीयं सविकल्पकज्ञाने ते-
नदेयत्रद्वानोपितु श्रुद्दयाभवति तत्र सविकल्पकज्ञानं द्वारीकृत्य निर्विकल्पकं ज्ञानं द्वाने चङ्ःस्वसाधन-
त्वज्ञानं यथा सत्तोममडःस्वसाधनमिति उपादानं चक्षुःसाधनत्वज्ञानं यथा स्वच्छेदनवनितादिकम-
त्स्वसाधनमिति उपदा चोभयसाधनत्वाभावज्ञानं त्वाणादाविति व्यापारवतः करणत्ववादिनः इत्यप्र-
त्यक्षप्रमाणनिरूपणम् ॥ ॥ ॥ ॥ ॥ ॥

पादानो

निर्विकल्पक ज्ञानद्वारा सन्निकर्षः तृतीयं च सविकल्पक ज्ञाना

चेन्न ७४

प्रत्यक्षप्रमाणं निरूपयति इन्द्रियेति इन्द्रियं चक्षुरादिकमर्थो घटादिस्तयोः सन्निकर्षः संयोगादिस्तज्जन्यं ज्ञानं
न.ही प्रत्यक्षमित्यर्थः सन्निकर्षध्वंसवारणाय ज्ञानमिति अनुमित्यादिवारणायेन्द्रियार्थसन्निकर्षेति ननु सोपने
२८ राधा त्रचक्षुषा कथं परार्थग्रहणं चक्षुषउपनेत्रनिरुद्धत्वेन पदार्थेन सह सन्निकर्षाभावात्तथैवा स्वच्छजाकूपीस
लिलादिव्यवहितमत्स्यादेश्चक्षुषा ग्रहणमिति स्वच्छद्रव्येतेजोनिरोधकाभावेन नदंतस्वतः प्रवेशसंभवात् अथ दर्प
णेकथं मुखप्रत्यक्षमिति चेन्न दर्पणेनाममचक्षुषैव पराहत्यामुखेमायाप्रत्यक्षजननात् कचित्स्वच्छद्रव्यसे

न्यं

इन्द्रियार्थसन्निकर्षजं ज्ञानं प्रत्यक्षम्

वदोषवशाद्दन्यथाभाने दर्पणे मुखं पश्यामीति धीस्तु भ्रममेव अतएव प्रतिबिंबेपारत्वं न चेश्वरप्रत्यक्षेव्या
प्तिरितिवाच्यं अत्र जन्यप्रत्यक्षस्यैव लक्षितत्वात् यदाह भगवान्सूत्रकारः इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञान राम कृष्ण
निर्विकल्पकं मव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षमिति अन्येतु ज्ञानाकरणकं ज्ञानं प्रत्यक्षं इदं चेश्वरज्ञानसाधा २८
रणमिति इति प्रत्यक्षप्रमाणनिरूपणम् ॥ ॥ ॥ ॥ ॥ ॥ ॥

भ्रमभिन्नं २=

प्रत्यक्षप्रमामेव विभजते तदिति। निष्प्रकारकमिति नामजात्यादियोजनादीनं वस्तुमात्रावगाहि ज्ञानमित्यर्थः
ननु निर्विकल्पके किम्मानमिति चेन्न अयं घट इति विशिष्टबुद्धिः विशेषणज्ञानजन्या विशिष्टबुद्धित्वाद्द
ण्डीति विशिष्टबुद्धिवदित्यनुमानस्यैव मानत्वात् अत्र घटत्वरूपं यद्विशेषणं तज्ज्ञानमेव निर्विकल्पकमित्यु
च्यते न च विशेषणज्ञानमपि सविकल्पकमेवास्तामिति वाच्यमनवस्थाप्रसंगात् इति निर्विकल्पकनि

तद्द्विविधं निर्विकल्पकं सविकल्पकं च तत्र निष्प्रकारकं निर्विकल्पकं
सप्रकारकं सविकल्पकं ॥ यथा डित्थोयं ब्राह्मणोयं श्यामोयमिति॰

रूपणं सप्रकारकमिति। विशिष्टज्ञानमित्यर्थः अत्र नास्तिकाः सविकल्पकं न प्रत्यक्षं तस्य घटत्वादिरूपाऽ
लौकिकापरक्तत्वात् वंध्यापुत्रज्ञानवन्निर्विकल्पकं स्वलक्षणवस्तूपरक्तत्वात्स्यादेव प्रत्यक्षं न च तर्हि कि
मुल्लेखवती अयं घटोयं घट इत्यकाकारप्रतीतिर्विलक्षणैव्वयदेश[illegible]तः सर्वात्मगतो धर्म आवश्यक इति वा
च्यं नस्यानेह्यावृत्यात्मकत्वात् अतह्यावृत्तिस्वगतभिन्नभेदः स च नञ्चापवृत्याऽज्ञसदसत् विधिमत्वेनैका
कारप्रतीतेस्तस्य निषेधरूपत्वायोगात् इति सविकल्पकनिरूपणम् ॥ ॥ ॥ ॥ ॥ ॥

त. टी. राधा २९

अत्र प्रत्यक्षप्रमायां षड्विधा घ्राणजरासनचाक्षुषश्रौत्रत्वाचमानसभेदात् घ्राणजत्वादिकं तु जिघ्रामि रसयामि
पश्यामि शृणोमि स्पृशामि मनसा सुखं साक्षात्करोमीत्यनुभवसाक्षिको जातिविशेषः ननु प्रत्यक्षकारणी
भूतेन्द्रियनिष्ठप्रत्यक्षसमानाधिकरणघटकसन्निकर्षः कः इत्यपेक्षायां तं विभज्य दर्शयति प्रत्यक्षे तु लौ
किकप्रत्यक्षेत्यर्थः संयोग इत्यादाविति चक्षुषेति तथा च द्रव्यचाक्षुषत्वाचमानेषु संयोग एव सन्निक
र्ष इति भावः द्वितीयमुदाहरति घटरूपेति चक्षुषा जननीये इत्यनुषज्यते तथा च द्रव्यसमवेतचाक्षुषत्वा

तत्र प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः संयोगः संयुक्तसमवायः समवायः समवेतसमवायः वि
शेषणविशेष्यभावश्चेति चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः घटरूपप्रत्यक्षजनने संयु
क्तसमवायः सन्निकर्षः चक्षुःसंयुक्ते घटे रूपस्य समवायात्॥ संयुक्तसमवेतसमवायः २

चमानसरासनघ्राणजेषु च संयुक्तसमवाय एव सन्निकर्ष इत्यर्थः ननु रूपैकत्वं चक्षुषः संयुक्तसमवाय इति
त तदुपपादयति चक्षुषः संयुक्तमिति ननु दूरस्थघटादौ सत्यपि संयुक्तसमवाये परिमाणग्रहणं किमिति
नेति चेदत्राह परिमाणग्रहणे चक्षुष्यसन्निकर्षोप्यर्थिकं कारणम् स च इन्द्रियावयवार्थावयवयोरिन्द्रि
यावयवार्थावयविनोरिन्द्रियावयव्यर्थावयवयोरिन्द्रियावयव्यर्थावयविनोश्चेति उक्तं दूरत्वदोषवशादेव.

कृष्ण राम. २९

प्रो.च.२८

नव्या:१ दूरत्वदोष१

त्तनीयमुदाहृतिरूपेति रूपत्वाख्यं सामान्यं तत्पुनन्यत्रेत्यर्थः अत्रापि चक्षुराजननीयमित्यनुवर्त्तते तथा चक्षुः
समवेतसमवेतचाक्षुषरासनघ्राणजस्पार्शनमानसेषु संयुक्तसमवेतसमवायएव सन्निकर्षइतिभावः अथ
द्रव्यतत्समवेतप्रत्यक्षेपिसंयुक्तसमवेतसमवायएव सन्निकर्षोस्त्विति चेन्नैतत् आत्मनोनध्यक्षप्रसङ्गा
त् समवायसन्निकर्षमुदाहरति श्रोत्रेति शब्दसाक्षात्कारेजननीयइति शेषः ननु श्रोत्रशब्दयोः कथंस
मवायइत्यपेक्षमाणं प्रतितमुपपादयति कर्णेति अथसमवायस्यनित्यत्वेनशब्दप्रत्यक्षेको व्यापार

रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः चक्षुःसंयुक्ते घटे रूपंसमवेतं तत्र रूपत्वस्यसम
वायात् श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः कर्णविवरवर्त्याकाशस्यश्रोत्रत्वात् शब्दस्या
काशगुणत्वाद्गुणगुणिनोश्च समवायात् शब्दत्वप्रत्यक्षे समवेतसमवायः सन्निकर्षः श्रोत्रसमवे
तेशब्देशब्दत्वसमवायात् अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः घटाभाववद्भूतल

इति चेच्छब्दः श्रोत्रमनःसंयोगोवेतिग्रहणसमवेतसमवायमाहशब्दत्वइति विशेषणविशेष्यभावइति विशे
षणभावो विशेष्यभावश्चेतिबोध्यम् इन्द्रियसंबद्धविशेषणमिन्द्रियसंबद्धविशेष्यत्वमिति यावत् विशे
षभावसन्निकर्षमुपपादयति घटाभाववदिति इहभूतलेघटोनास्तीत्यादौविशेष्यतासन्निकर्षोवेस
यः समम्यंतस्यविशेषणत्वात् अत्रेदंबोध्यं इन्द्रियसंयुक्तविशेषणतासंयुक्तसमवेतविशेषणतादिभेदेनत
स्यानेकविधत्वेपिविशेषणतात्वेनसैकैवएवंविशेषणताविशेष्यतयोरन्यतरत्वेनग्रहणमतोनसन्नि·

कर्षषट्कविशेषः इतिसन्निकर्षषट्कविचारः ॥

राधा
त॰दी॰
३०

ननुविशेषणतासन्निकर्षएवनास्ति एतएवभावप्रत्यक्षेयोग्यानुपलब्धिः कारणमितिचेन्न यद्यत्रघ
टःस्यात्तर्हिभूतलमिवाद्रक्ष्यत तादर्शनाभावान्नास्तीतिघटरूपप्रतियोगिप्रसञ्जनात्तर्कितोयोघटोपलम्भः
तत्प्रतियोगिकाभावात्मकयोग्यानुपलब्धिसहकृतेनेन्द्रियेणैवाभावप्रत्यक्षसंभवेनुपलब्धेःकारणत्वस्या
न्याय्यत्वात् अभावाधिकरणप्रत्यक्षे प्रतीन्द्रियकरणत्वस्यावश्यकत्वेनाभावप्रत्यक्षत्वप्रत्ययेपिविशेषणा॰
तासन्निकर्षस्वीकृत्यतस्यैवकरणत्वौचित्यादित्यास्तांविस्तरः इत्यनुपलब्धिवादखंडनम् इदानीम
लौकिकसन्निकर्षोनिरूप्यते सन्निविधः सामान्यलक्षणोज्ञानलक्षणोयोगजधर्मलक्षणश्चेति॰ त
त्राद्यः इन्द्रियसंबद्धविशेष्यकज्ञानप्रकारीभूतधर्म्मत्वादिः ~~भवतिचघटत्वादि~~ भवतिचघटत्वादिरिन्द्रि
यसंबद्धविशेष्यकेयंघटइतिलौकिकप्रत्यक्षेप्रकारः तदनेनतत्तेनसन्निकर्षेणसर्वेघटाइतिलौकि
कप्रत्यक्षंजायते नचेन्द्रियसंबद्धसामान्यप्रत्यासत्तिः मृगतृष्णादौजलभ्रमानन्तरंसकलजलज्ञा
नेनस्यात् नचेन्द्रियजलत्वयोःसम्बन्धाभावात् मानसस्थलेपिज्ञानप्रकारीभूतंसामान्यमेवप्रत्यासत्तिः
अन्यथापरमाणुत्वेनयत्किंचित्परमाणूपस्थितौपरमाणुत्वसामान्यलक्षणयासकलपरमाणु
लौकिकीमानसप्रतीतिर्नस्यात् परमाणुमनसोः सम्बन्धाभावात् ॥

कृष्ण
राम
३०

द्वितीया यथा यत्र सौरभज्ञानलक्षणया चाक्षुषमामप्या चक्षुरभिचन्दनखण्डमिति सौरभांशेलौकिकं-
चन्दनखण्डांशेलौकिकं चाक्षुषंजायते तत्र सौरभज्ञाने सौरभस्य प्रत्यासत्तिः सौरभांशे चक्षुः सन्निकर्षास
म्भवादित्यग्रन्थत्रविस्तरः तृतीयस्त्वदृष्टविशेषएव सद्विविधः युक्तयुञ्जानभेदाद्योगिनो। द्विविधात् तत्र युक्त
स्य योगिनो हि प्रथमप्रत्यासत्यानित्यं तत्र समखिलपदार्थज्ञानंजायते युञ्जानस्य चिन्ताविशेषसनाथ्याद्वितीयप्र
त्यासत्त्यासमवायविशेषेणज्ञानंजायते युञ्जानस्य चिन्ताविशेषसनाथ्य द्वितीयप्रत्यासत्त्यासमवायविशे
षेणाज्ञानंजायते इत्यलौकिकसन्निकर्षः ननु योगिसद्भावे किम्प्रमाणमिति चेत् परमाणवादिर्जन्यप्रत्य

एवंसन्निकर्षषट्कजन्यंज्ञानम्प्रत्यक्षम् तत्करणमिंद्रियं तस्मादिंद्रियम्प्रत्यक्षप्रमाणमितिसिद्धम्

त्वविषयोभिधेयत्वाद्घटवदित्यनुमानेनग्रहणं तत्प्रत्यक्षन्त्वनास्माकं किन्तु योगिनामेवेत्यर्थः प्रत्यक्षप्र
माणमुपसंहरति एवमिति उपदर्शितक्रमेणेत्यर्थः ननु सिद्धान्ते प्रत्यक्षज्ञानकरणमिंद्रियार्थसन्निकर्षः
किंन स्यादिति चेन्नेत्याह तत्करणमिति प्रत्यक्षप्रमाणनिगमयति तस्मादिति प्रत्यक्षप्रमाकरणत्वा
दित्यर्थः सिद्धमिति सिद्धान्तेसिद्धमित्यर्थः इतिश्रीसिद्धान्तचंद्रोदयेप्रत्यक्षखंडंसमाप्तम् ॥ॐ॥ ॥

राधा

न टी.

२१

प्रत्यक्षानुमानयोरुपजीव्योपजीवकभावसंगतिमभिप्रेत्य प्रत्यक्षानन्तरमनुमानं निरूपयति अनुमि
तीति अनुमितेः करणमनुमानमित्यर्थः तच्च लिङ्गपरामर्श एवेति निवेदयिष्यते अथानुमितिं लक्ष
यति अनुमितिकरणमनुमानमित्यर्थ इति केचित्तत्र आह परामर्शेति प्रत्यक्षादिवारणाय विशेषणं परामर्शध्वंस
वारणाय विशेष्यम् अथ परामर्शप्रत्यक्षेऽतिप्रसक्तिरिति चेन्नैवम् साधनानवगाहित्वेनापि विशेषणी
यत्वात् न च तथा सति धूमवान् पर्वतो वह्निमानित्याकारकलिङ्गोपहितलैङ्गिकभानात्मकानुमितावव्या
प्तिरिति वाच्यम् तादृशानुमितेरस्वीकारात् ननु स्थाणुर्वा पुरुषो वेति संशयानन्तरम् पुरुषत्वव्याप्यकरा

अनुमितित्वावच्छिन्न
कार्यत्वनिरूपितक
रणतापूर्वालिङ्गविमित्यर्थः १

अनुमितिकरणमनुमानं परामर्शजन्यं ज्ञानमनु
मितिः व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः ॥

दिमानयमिति विशेषदर्शने सत्ययम्पुरुष एवेति प्रत्यक्षोदयान्नज्ञानिव्याप्तिरिति चेन्न समानविषयक
प्रत्यक्षसामग्र्यभावसहकृतपरामर्शजन्यत्वस्यैव विवक्षितत्वात् अत्र च पक्षविशेष्यकपरामर्शोत्पन्नावि
शेष्यकापन्नप्रकारकपरामर्शोत्पन्नप्रकारिका हि विधादपि परामर्शोत्पन्नविशेष्यकैवेत्यपरे इत्या
स्तामन्वित्यत्र इत्यनुमितिलक्षणम् ननु च परामर्शः किमनयान्विरोधि व्याप्तीति विषयिता संबंधेन
व्याप्तिविशिष्टे यत्पक्षधर्मताज्ञाने परामर्श इत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥ ॥

गम. टाइम
२१

परामर्शमभिनीय दर्शयति यथेति तथाच वह्निव्याप्येत्यत्र व्याप्तेर्भानात् धूमवानित्यत्र पक्षधर्मताया भाना-
द्वह्नेरेव व्याप्तिविषयकं पक्षधर्म्मताविषयकं चेति भावः नन्वेतावता परामर्शोवगतस्तज्जन्यत्वघटितलक्ष-
णाविशिष्टानुमितिः कीदृश्यपेक्षामभिनयति तज्जन्यमिति परामर्शजन्यमित्यर्थः इति परामर्शः अथ व्या
प्तिविशिष्टेत्यत्र का व्याप्तिरित्याकांक्षायामाह यत्रेति यत्र धूमस्तत्राग्निरिति व्याप्तेरभिनयः साहचर्यनियम

यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः तज्जन्यं पर्वतो वह्निमानिति
ज्ञानमनुमितिः यत्र धूमस्तत्राग्निरिति चर्यनियमो व्याप्तिः ॥ ॥ ॥
साह

इति लक्षणं सहचरतीति सहचरस्तस्य भावः साहचर्यं सामानाधिकरण्यमिति यावत् तस्य नियमो व्याप्ति-
रित्यर्थः स चाव्यभिचरितत्वं तच्च व्यभिचाराभावः व्यभिचारश्च साध्याभाववद्वृत्तित्वं तथा च साध्याभाववद्-
वृत्तित्वं व्याप्तिरिति पर्यवसन्नं वह्निमान्धूमादित्यादौ साध्यो वह्निस्तदभाववन्तो जलह्रदादयस्तद्वृत्तित्वंनो
कालावद्वृत्तित्वं प्रकृते हेतुभूते धूमे इति कृत्वा लक्षणसमन्वयः ॥ ॥ ॥ ॥ ॥ ॥

साध्ये

राधा
न दी.
३२

धूमवान्वह्नेरित्यादौ धूमस्तदभाववदयोगोलकं तद्वृत्तित्वमेव वह्न्यादाविति नातिव्याप्तिः न चेदं वाच्यं ज्ञेयत्वा
दित्यत्र साध्याभावाप्रसिद्ध्याऽव्याप्तिः न च सोदोपाध्यायैर्व्यधिकरणधर्मावच्छिन्नाभावस्योपगमेन तत्र वाच्यत्व
त्वेन वाच्यत्वाभावस्य समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्याप्रसिद्धत्वेऽपि घटत्वेन वाच्यत्वाभावस्य
व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य प्रसिद्धत्वेन कथमव्याप्तिरिति शंक्यं चिंतामणिकारेण तस्य
खंडितत्वात् अंगीकारपक्षेऽपि तद्वद्वृत्तित्वस्याप्रसिद्धेः प्रकृते तस्यानुपयोगाच्चेति चेन्न केवलान्वयिन्य
नुमितेरस्वीकारात् स्वीकारे भ्रमात्मिकासेति न व्याः अत्रोच्यते स च हेतुसमानाधिकरणात्यंताभावाप्र
तियोगिसाध्यसामानाधिकरण्यं वह्निमान्धूमादित्यत्र हेतुर्धूमस्तत्सामानाधिकरणे योऽत्यंताभावो
घटात्यंताभावस्तत्प्रतियोगी घटो न प्रतियोगी वह्निरूपे साध्ये तत्सामानाधिकरण्यं धूम इति हेतुत्वात्तल्लक्ष
णसमन्वयः धूमवान्वह्नेरित्यत्र हेतुर्वह्निस्तत्सामानाधिकरणे योऽत्यंताभावोऽयोगोलके धूमात्यंता
भावस्तत्प्रतियोग्येव धूमरूपं साध्यमिति नातिव्याप्तिः इदं वाच्यं ज्ञेयत्वादित्यादौ हेतुर्ज्ञेयत्वं तत्सामा
नाधिकरणे योऽत्यंताभावः घटात्यंताभावस्तत्प्रतियोगी घटस्तदप्रतियोगि वाच्यत्वरूपे साध्ये ॥ ॥

राम-कृष्ण
३२

नत्समानाधिकरणं त्वेयन्त्वइति हेत्वानां निर्व्याप्तिः अथैककपिसंयोगी एतद्वृक्षत्वादित्यत्र हेतु वेतद्वृक्षत्वं त
त्समानाधिकरणो योऽत्यन्ताभावो मूलावच्छेदेन कपिसंयोगात्यन्ताभावस्तत्प्रतियोगित्वमेव कपिसंयोगे इदं
साध्यमित्यव्याप्तिरिति चेन्न प्रतियोग्यव्यधिकरणहेतुसमानाधिकरणात्यन्ताभावस्याभिमतत्वादित्यल
मतिकर्कशविचारेण बालानामिति व्याप्तिवादः ननु ज्ञाते व्याप्तिः पक्षधर्मताज्ञानमित्यत्र कानाम पक्ष
धर्मता इत्यपेक्षायामाह प्रतितत्स्वरूपं निरूपयति व्याप्यस्येति व्याप्यो नाम व्याप्त्याश्रयः स च धूमादिरेव त

व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता अनुमानं द्विविधं स्वार्थं
परार्थं च स्वार्थं स्वानुमितिहेतुः तथाहि ॥

स्य पर्वतादिनिरूपितवृत्तित्वं पक्षधर्मतेत्यर्थः अथ कथमनुमानमनुमितिकरणं कथं वा तस्मादनुमिति
जनिरिति जिज्ञासमानं प्रति लाघवादेवानुमानविभागमुखेनैव बोधयितुमनुमानं विभजते अनुमा
नमिति द्वैविध्यं दर्शयति स्वार्थं परार्थं चेति स्वस्यार्थः प्रयोजनं यस्मात् तत्स्वार्थमिति समासः स्वप्रयोज
नं च स्वस्यानुमेयप्रतिपत्तिः एवं परार्थमित्यस्यापि इदमेव वचनात्पर्यं मनसि निधाय स्वार्थानुमानं ल

विधं निश्चयः शंका च तद्विरहः क्वचिन्न तर्कात् यथा धूमाग्न्योर्व्याप्तिग्रहे धूमो वह्नि व्य ४

तदी.
राधा
३३

भूयोदर्शनेनेति धूमाग्न्योर्व्याप्तिग्रहे साध्यसाधनयोः भूयः सहचारदर्शनेनेत्यर्थः नन्वपार्थिवत्वलोह
लेख्यत्वादौ शतशः सहचारे ज्ञातेपि वज्रादौ व्यभिचारोपलंभेन कथमिदं व्याप्तिग्राहकमिति चेन्न सह
चारज्ञानपदेन व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्यैवाभिमतत्वात् व्यभिचारज्ञानं च द्विविधः
यथार्थमयथार्थं च तदपि द्विविधं व्यभिचारो न वेति शंका यथा धूमो वह्निव्यभिचारीति निश्चय एवापादितधूमो वह्नि
व्यभिचारी स्यात्तदा वह्निजन्यो न स्यादिति धूमाग्न्योः कार्यकारणभावभंगप्रसंगरूपतर्को यदि भवति तदा तस्मा
देव तर्कात् व्यभिचारज्ञानं निवर्तते अतस्तत्र तर्कादेव व्यभिचारज्ञानविरहः क्वचित्स्वतः सिद्ध एव यथाय·

स्वयमेव भूयोदर्शनेन यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतं गतस्तद्गते चाग्नौ संदि
हानः धूममुपलभ्य व्याप्तिं स्मरति यत्र धूमस्तत्राग्निरिति ॥

हानः धूमे व्यभिचारज्ञानं न तावत् यत्र धूमस्तत्राग्निरिति धूमत्वावच्छिन्नाग्नित्वव्याप्यमिति अग्न्यदेशान्तरीय
अग्निधूमानामिन्द्रियसन्निकर्षासंभवेन कथं धूमसामान्याग्निसामान्यव्याप्तिग्रह इति चेन्न धूमत्ववह्नि
त्वरूपसामान्यलक्षणप्रत्यासत्त्यैव सकलधूमाग्निज्ञानसंभवेन तत्र व्याप्तिग्रहस्यापि संभवात् महान
सादाविति महानसाद्यवच्छेदेन धूम इत्यर्थः तद्गते च पर्वतनिष्ठे च शाद्वलो वा वाक्यालंकारे ननु परामर्शमपि
व्याप्तिज्ञानस्य कारणत्वेन तत्र सर्वत्र पर्वतादौ महानसाद्यवच्छेदेन गृहीतव्याप्तेः कथं ज्ञानमत आ

राम· कृष्ण
३३

तथाधूमदर्शनरूपोहेतोर्यकवलाद्व्याप्तिस्मरणंभवत्येव तदनंतरमिति व्याप्तिस्मरणोत्तरकालइत्यर्थः लिंग
परामर्शेति व्याप्तिबलेनलीनमर्थंगमयतीति लिंगंतत्वधूमादिस्तस्य परामर्शोज्ञानविशेषइत्यर्थः तस्मा
दितिलिंगपरामर्शादित्यर्थः स्वार्थमनुमेयसदृशति तद्देतदीत यस्मादिदंस्वप्रतिपत्तिहेतुस्तस्मादेतत्स्वार्था
नुमानमितिसंबंधः अथा[illegible]वयपर्वतेनामइच्छाममवोधिकारणात्वप्रतिज्ञादिषु तदसमर्थवाक्यैःयमेतेव
[illegible]

तदनंतरंवह्निव्याप्यधूमवानयंपर्वतइतिज्ञानमुत्पद्यते अयमेवलिंगपरामर्शइत्युच्यते तस्मात्पर्वतो
वह्निमानितिज्ञानमनुमितिरुत्पद्यते तदेतत्स्वार्थानुमानं यत्स्वयंधूमादग्निमनुमायपरंबोधयितुं
पञ्चावयववाक्यंप्रयुज्यते तत्परार्थानुमानम् यथापर्वतोग्निमानधूमवत्वात् योयोधूमवान्
सस्सोग्निमान्यथामहानसः तथाचायंतस्मात्तथेति अनेनप्रतिपादितात्लिंगात्परोप्यग्निंप्रतिपद्य
ते

यवाः स्युरितिचेदनुमानवाक्यैकदेशत्वादवयवाइवावयवाइत्युपचर्यंतइतिगृहाण नन्वेवमपिपंचाव
यववाक्यस्यानुमानत्वमेवनविचारसहंतस्यलिंगपरामर्शत्वाभावादितिचेन्मैवं लिंगपरामर्शप्रयोजक
लिंगप्रतिपादकत्वेनानुमानमित्युपचारमात्रत्वात् तदुदाहरति यथेति तथाचायमिति अयंचपर्वत
स्तथावह्निव्याप्यधूमवानित्यर्थः तस्मात्तथेतिवह्निव्याप्यधूमवानित्यर्थः तस्मात्तथेतिवह्निव्याप्यधू

मवत्वात् वह्निमानित्यर्थः अनेनपंचावयववाक्येनेत्यर्थः इतिपरार्थानुमानं

राधा त.दी. ५६ तत्व

नन्वयं चावयववाक्यमित्यत्र के ते पंचावयवाः अतस्तान्दर्शयति प्रतिज्ञेति प्रतिज्ञाद्यन्यतमत्वमवय
वत्वं साध्यविशिष्टपक्षबोधकवचनं प्रतिज्ञा पंचम्यंतं तृतीयांतं वा लिंगवचनं हेतुः व्याप्तिप्रतिपादकदृ
ष्टान्तवचनमुदाहरणं उदाहरणव्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकं वचनमुपनयः पक्षे साध्य
स्याबाधितत्वप्रतिपादकवचनं निगमनं इदमेव लक्षणं हृदि निधाय प्रतिज्ञादीन्विशिष्य दर्शयति पर्वतो
वह्निमानित्यादिना उक्तावयवजन्यः ज्ञायमानं लिंगमनुमितिकरणमिति नव्यास्तु इयं यज्ञशाला वह्नि
मती अतीतधूमादित्यादौ लिंगाभावेप्यनुमितिदर्शनादिति प्राञ्चस्तु लिंगपरामर्श एव करणमित्याचक्षुः

प्रतिज्ञादेरुदाहरणोपनयनिगमनानि पंचावयवाः पर्वतो वह्निमानिति प्रतिज्ञा धूमवत्त्वादिति हेतुः यो यो धूम
वान्स सोग्निमान् यथा महानसमित्युदाहरणं तथा चायमित्युपनयः तस्मात्तथेति निगमनं स्वार्थानुमितिपरार्थानुमि
त्योर्लिंगपरामर्श एव करणं तस्माल्लिंगपरामर्शोनुमानं लिंगं त्रिविधं अन्वयव्यतिरेकि केवलान्व

लिंगपरामर्शः करणमित्याचक्षुः लिंगपरामर्श एवेति अनुमानमुपसंहरति तस्मादिति अनुमितिकरण
त्वादित्यर्थः अयमेव तृतीयज्ञानमित्युच्यते तथाहि महानसादौ धूमाग्न्योर्व्याप्तौ गृह्यमाणायां यद्धूमज्ञा
नं तदाद्यमिदं पक्षे यद्धूमज्ञानं तत् द्वितीयं अत्रैव वह्निव्याप्यत्वेन धूमज्ञानं तृतीयं इदमेव लिंगपरामर्श इत्युच्य
ते मीमांसकास्तु धूमवान्पर्वत इति पक्षधर्मताज्ञानं धूमो वह्निव्याप्य इति व्याप्तिस्मरणं एतदुभयमेवानु
मितिकरणं न तु लिंगपरामर्शोपि गौरवादिति जजल्पुः न किंचिदेतत् इत्थं वान्यथा तु धूमो वह्निव्याप्य इ-

एम. २४ कृष्ण

अन्वयव्यतिरेकिणो लक्षणमाह अन्वयेनेति तृतीयायाः प्रयोज्यत्वमर्थः साध्यसाधनयोः साहचर्यमन्वयः त
दभावो ऽसाहचर्यं धूमवत्त्वमिति धूमवत्त्वात्मकं लिंगमित्यर्थः ननु कथमत्रान्वयव्याप्तिर्व्यतिरेकिव्याप्तिश्चेत्या
कांक्षायां तां क्रमेणाभिनीयाह यथेति तथान्वयव्याप्तिरुपदर्शितैव व्यतिरेकव्याप्तिश्च साध्याभावव्यापकीभू
ताभावप्रतियोगित्वमित्यर्थः केचित्तु साध्याभावसाधनाभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः अन्यनिष्ठव्याप्याक
थं साधनात्साध्यमितिरिति चेत्साध्याभावव्यापकीभूताभावप्रतियोगित्वेन साधनस्य पक्षवृत्तित्वज्ञानं सहका

अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि यथा वह्नौ साध्ये धूमवत्त्वं यत्र धूमस्तत्राग्निरित्यन्वय
व्याप्तिः यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रद इति व्यतिरेकव्याप्तिः अन्वयमात्रव्याप्तिकं
केवलान्वयि यथा घटोऽभिधेयः प्रमेयत्वात्पटवदिति॥

रीति तदुक्तं व्याप्यव्यापकभावो हि भावयोर्या
दृगिष्यते तयोरभावयोस्तस्माद्विपरीतः प्रतीयते अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते व्यतिरेकि दृष्टा
न्तमाह यथा महाह्रद इति यद्यप्यन्वयव्याप्तेः प्रागदर्शितत्वात्तु तत्स्य दर्शनमनुचितं तथापि तदानीं तस्या
स्तत्त्वेनाप्रदर्शितत्वान्न दोषः केवलान्वयिनो लक्षणमाह अन्वयेति अन्वयेनैव व्याप्तिर्यस्मिन्स तथा
उदाहरति यथेति॥ ॥ ॥ ॥ ॥ ॥ ॥

राधा न टी. ३५

अन्वयव्यतिरेकिणो लक्षणमाह [illegible] अन्वयेनेति तृतीया प्रयोज्यत्वमर्थः साध्यसाधनयोः साहचर्यमन्वयः तद
भावयोः साहचर्यं [illegible] प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिं निराकरोति अन्वे
ति अभिधेयत्वसाध्यकानुमानमित्यर्थः ननु कृतमन्विषयो न तत्र देत्यमाह सर्वस्येति पदार्थमात्रस्येत्यर्थः
तथा च सकलपदाभिधेयत्वस्येश्वरप्रमाविषयत्वस्य चात्यंताभावाप्रतियोगित्वरूपकेवलान्वयित्वेन तदभा
वाप्रसिद्ध्या तद्घटितव्यतिरेकव्याप्तिर्न संभवत्येवेति भावः केवलव्यतिरेकिणो लक्षणमाह व्यतिरेकेति पूर्व

अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति सर्वस्य प्रमेयत्वादभिधेयत्वाच्च व्यतिरेकव्याप्तिकं के
वलव्यतिरेकि यथा पृथिवी इतरेभ्यो भिद्यते गंधवत्वात् यदितरेभ्यो न भिद्यते न तद्गंधवत् यथा ज
लं न चेयं तथा न तस्मान्न तथेति अत्र यद्गंधवत्तदितरेभ्यो भिन्नमित्यन्वयदृष्टान्तो नास्ति पृथिवीमात्र

वत्पक्षमात्रोऽनुसंधेयः तथा च गंधत्वाभावत्वाभावादिति तद्भेदाभाववतीनेत्यर्थः ननु अत्र किमितिना न्वयव्या
प्तिरित्याशंकां परिहरति अत्रेति इतरभेदसाध्यकानुमान इत्यर्थः इदमुपलक्षणं जीववच्छरीरं सात्मकं
प्राणादिमत्वात् यन्नैवं तन्नैवं यथा घटः प्रत्यक्षादिकं प्रमाणमिति व्यवहर्तव्यं प्रमाकरणत्वात् यन्नैवं तन्नै
वं यथा प्रत्यक्षाभासः विवादास्पदमाकाशमिति व्यवहर्तव्यं शब्दवत्वादित्यादिकमपि केवलव्यतिरेकी
ति द्रष्टव्यं अथ येन भेदः प्रसिद्धो न वा नाद्यः यत्र प्रसिद्धः तत्र गंधवत्त्वस्यापि सत्वेन हेतोर्यमसत्वच्छिरसि.

राम कृष्ण ३५

नीराभिषेकः तदधिकरणस्यैवान्वयिदृष्टान्तत्वेन केवलव्यतिरेकित्वव्याघातात् यदि तत्र नास्ति तं
यव त्वं तदा तस्यासाधारणत्वापत्तिः नहि तीयः विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वेन पृथिवीतरभे
दवतीति साध्यविशिष्टानुमित्युत्पत्तेः विशेषणीभूतेतरभेदस्य प्रसिद्धात तज्ज्ञानस्याप्रसिद्धेः नच के
वलमिदमेव दूषणं वर्वर्ति व्यतिरेकव्याप्तिज्ञानस्याप्यसंभवेन दूषणान्तरस्यापि जागरूकत्वात् क
थं तदसंभव इति चेत् न तज्जनकेतरभेदाभावज्ञानस्यायोगात् स एव कुत इति चेत् न तादृशज्ञानका
रणीभूतेतरभेदज्ञानाप्रसिद्धेः नचैवं कथं तत्र कारणमिति अभावज्ञाने प्रतियोगिज्ञानस्य का
रणत्वादिति मावदृगर्वम् जलभेदस्य तेजसि तेजोभेदस्य जल इतिरीत्या इतरभेदस्य प्रत्येकाधिकर
णे प्रसिद्धात पृथिव्यां तत्तदेकैकस्य साधनीयत्वात् विशिष्टानुमितिसंभवात् एतत्र व्यतिरेकव्याप्तिज्ञा-
नमपि संभवति इतरभेदपदलस्य पदार्थैकैः प्रसिद्धत्वेन नान्वयदृष्टान्त अप्रत एव नासाधारणमपी
ति कृतं पल्लवितेन तच्चेदं बोध्यं अन्वयव्यतिरेकि तत् पंचरूपोपपन्नं तानि कानीति चेत् उच्यते पक्ष
सत्वं विपक्षासत्वं अबाधितविषयत्वं असत्प्रतिपक्षत्वं पक्षधर्मत्वं चेति अबाधितः साध्यरूपविषयो य
स्य तं तस्य भावस्तत्त्वं एवं साध्याभावसाधकहेतुत्वं नेति सत्प्रतिपक्ष इत्युच्यते स नास्ति यस्य मोः सत्प्रतिप
क्षस्तस्य भावस्तत्त्वमिति विवेच्यम् केवलान्वयिनं च तत्रूपोपपन्नमेव स्वसाध्यसाधयितृत्वमनेनस्यापि
ते विपर्ययेणान्याप्तनिविपर्ययात् केवलव्यतिरेकोपि तत्तथात्वपक्षविपर्ययेणान्तत्वविषय

त टी. ३६ अत्र पृथ्वीमात्रस्य पक्षत्वादित्यत्र किंनाम पक्षतेत्यपेक्षायां तं निर्वक्ति संदिग्धेति अत्र घनगर्जितेन मेघानुमि
तिस्थलत्राव्याप्तिः वह्निमत्पक्षकालीनाग्रेमिति र्मेजायतामित्यनुमित्साजन्या [illegible]
[illegible] नुमितिस्थले च न तत्र संदिग्धसाध्याभावादिति चेन्न पक्षतामतेन तत्रानुमितेरस्वीकारात् तदुक्त
नानुपलब्धेन निर्णीतेर्थे न्यायः प्रवर्तते अपितु संदिग्धार्थ एवेति अथवा सिसाधयिषाविरहविशिष्ट
सिद्ध्यभावः पक्षता साध्यसिद्धि सिद्धा सिसाधयिषा तत्र स्याविरहोभावस्तेन हि शिष्टा या सिद्धिः साध्यनिश्चयस्त
दभाव एव पक्षतेति तदर्थः वर्त्तते चात्रानुमितिप्राक्तनोपर्वते च तदानीं सिसाधयिषायाः सिद्धेश्चाभावा
त् अभावमात्रेन पक्षता पर्वते वह्निमनुमिनुयामिति सिसाधयिषयाम्यन्यकाले सिद्धिसत्वेप्यनुमित्याप

संदिग्धसाध्यवान्पक्षः यथा धूमवत्वे हेतौ पर्वतः निश्चितसाध्यवान्सपक्षः यथा [illegible]
तत्रैव महानसः निश्चितसाध्याभाववान्विपक्षः यथा तत्रैव महाह्रदः ॥ ॥ ॥ ॥

त्तिः तदानीं युक्तिं चिदभावस्य सत्वात् अस्तु सिद्ध्यभाव एव सेति चेत्पर्वतेनुमितिर्भूयादितीच्छाका
ले सिद्धिसत्वेप्यनुमितिर्जायते सा न स्यात् इदानीं सिद्ध्यभावात् सिसाधयिषाविरहविशिष्टत्वे सिद्ध्या·
भावव्याप्यकं तथा चानुमितौ सिसाधयिषोत्तेजिकात् हिरहविशिष्टसिद्धिरेव प्रतिबंधिका तदभावकारण राम. ३६
मिति फलितमिति दिक् इति पक्षता प्रसंगात्सपक्षविपक्षौ क्रमेणानिरूपयति निश्चेति तत्रैवेति स
मवत्वे हेतावेवेत्यर्थः ॥ श्रीरामाय नमः गोविंदाय नमः माधवाय नमः नारायणाय नमः

भावा

द्रव्यत्वादितिहे
तुः ३=

त्वं

एवमग्रेपि हेतन्निरूपणप्रसंगाद्धेत्वाभासानाह सव्यभिचारेति उपदर्शितरूपाणां मध्ये कतिपयरूपोपपन्नत्वाद्धे
त्ववदाभासंतेइति हेत्वाभासाः तत्वं चानुमितितत्करणान्यतरप्रतिबंधकयथार्थज्ञानविषयत्वं बाधस्थले
वह्निवत्तुलक्ष्यानुमितिप्रतिबंधकं यज्ज्ञानमुष्णत्वव्द्ह्रदावत्तुसत्वसाधकं द्रव्यत्वमित्याकारकं तद्विषय
त्वस्यद्रव्यत्वरूपहेत्वाभासेसत्वाल्लक्षणसमन्वयः इत्यसाधारणविरुद्धसत्प्रतिपक्षज्ञानस्यापिसाध्यवद
नुमितिकरणप्रतिबंधकबोध्यं बाधभ्रमसाध्याभाववत्ताहृसिद्धः पक्षोवा वह्निमान्प्रमेयत्वादित्यादौव्य

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पंचहेत्वाभासाः सव्यभि
चारोनैकांतिकः सत्रिधासाधारणासाधारणानुपसंहारिभेदात् ॥

भिचारिणि पर्वतोवन्हिमान्नित्याद्यनुमितिकरणं वह्निव्याप्यप्रमेयत्वमित्यादिज्ञानेतत्प्रतिबंधकेचव
न्ह्यभाववद्वृत्तिप्रमेयत्वमित्यादिज्ञानंतद्विषयत्वस्यप्रमेयत्वादौसत्वाल्लक्षणसंगतिः इत्थमनुपसंहा
रिप्रभृतिज्ञानानामनुमितिकरणप्रतिबंधकत्वंबोध्यम् बाधभ्रममादायसद्धेत्ववारणाययथा
र्थेतिदिक् इतिहेत्वाभाससामान्यनिरूपणं बालान्बोधयितुंप्राचीनसंकेतमाह सव्यनैकांतिकइति
तत्वचसाधारणाद्यन्यतमत्वंविभजते सोन्नु ... थाइति ॥ ॥ ॥ ॥ ॥

राधा
त·टी·
३०

साधारणं लक्षयति तत्रेति साधारणादित्रितयमध्य इत्यर्थः उदाहरति यथेति ननु प्रमेयत्वस्य कथं साध्या·
भाववद्वृत्तित्वमत आह उपपादयति प्रमेयत्वस्येति अथ विरुद्धेति प्रसक्तिरिति मास्म हृदय्यः सपक्षवृत्तित्वस्यापि
निवेशात् अथैवमपि स्वरूपासिद्धेर्दूषणाजागर्तीति मावदगर्वं पक्षवृत्तित्वस्यापि तथात्वात् अथैवमसा·
धारणं लक्षयति सर्वेति सर्वे ये सपक्षा विपक्षास्तेभ्यो व्यावृत्त इति निवर्तते इति व्यावृत्तः नित्येभ्यः सपक्षेभ्य

तत्र साध्याभाववद्वृत्तिः साधारणोनैकान्तिकः यथा पर्वतोग्निमान्प्रमेयत्वादिति प्रमेयत्वस्य वह्न्यभा
ववति ह्रदे विद्यमानत्वात् सर्वसपक्षविपक्षव्यावृत्तोसाधारण यथा शब्दो नित्यः शब्दत्वादिति शब्द
त्वं सर्वेभ्यो नित्येभ्यो नित्येभ्यो व्यावृत्तं शब्दमात्रवृत्तिअन्वयव्यतिरेकदृष्टान्तरहितोनुपसंहारी
यथा सर्वमनित्यं प्रमेयत्वादिति अत्र सर्वस्यापि पक्षत्वाद्दृष्टान्तो नास्ति साध्याभावव्याप्तो हेतुर्वि
रुद्धः यथा शब्दो नित्यः कृतकत्वादिति कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तं साध्याभाव
साधकं हेतुत्वं ॥

काशादिभ्यः अनित्येभ्यो विपक्षेभ्यो घटादिभ्य इत्यर्थः अनुपसंहारिणं लक्षयति अन्वयेति उपद
र्शितानुमान इत्यर्थः इति सव्यभिचारनिरूपणं विरुद्धं लक्षयति साध्येति कृतकत्वात्कार्यत्वादित्य
र्थः अनित्यत्वेन व्याप्तमिति यद्यत्कृतकं तत्तदनित्यमिति व्याप्तेर्भवत्येवेति भावः ॥ ॥ ॥ राम·कृष्ण
३०

सत्प्रतिपक्षं लक्षयति यस्येति यस्य हेतोः साध्याभावसाधकं साध्याभावस्यानुमापकं हेत्वन्तरं प्रतिपक्षो हेत्वन्तरं विद्यते स हेतुः सत्प्रतिपक्ष इत्यर्थः अयमेव प्रकरणसम इत्युच्यते असिद्धं विभजते असिद्ध इति आश्रयासिद्धाद्यन्यतमत्वमसिद्धत्वं त्रैविध्यं दर्शयति आश्रयासिद्ध इति आश्रयासिद्धत्वं च पक्षतावच्छेदकाभाववत्त्वं भवति हि अरविन्दे गगनीयत्वरूपपक्षतावच्छेदकाभाववत्त्वं अरविन्दरूपपक्षे गगनीयत्व

यस्य स सत्प्रतिपक्षः यथा शब्दो नित्यः श्रावणत्वात् शब्दत्ववदिति शब्दोऽनित्यः कार्यत्वात् घटवदिति असिद्धस्त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति आश्रयासिद्धो यथा गगनारविन्दं सुरभि अरविन्दवदिति अत्र गगनारविन्दमाश्रयः स च नास्त्येव स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात्

विरहात् आश्रयासिद्धमुदाहरति गगनेति ननु कथमरविन्दे गगनीयत्वविरहो न तत्राह अत्रेति उपदर्शितानुमाने इत्यर्थः स्वरूपासिद्धमुदाहरति पक्षावृत्तित्वं स्वरूपासिद्धत्वं इदमेव लक्षणं मनसि निधायोपपादयति अत्रेति यथा च चाक्षुषत्वं शब्दे रूपनाशेनाश्रितत्वेन न चाक्षुषत्वे पक्षावृत्तित्वमस्त्येवेति भावः ॥ ॥ ॥

त

भागासिद्धविशेष्यासिद्ध १४

राधा
त. टी.
३८

सोयंस्वरूपासिद्धः स्वरूपासिद्धिर्विशेषणासिद्धभेदेन बहुविधः तत्राद्यस्तूपदर्शित एव द्वितीयो यथा अस्त
रूपादिमत्त्वद्वयं गुणाः रूपत्वादित्यत्र रूपत्वहेतोः पक्षैकदेशावृत्तित्वेन भागे स्वरूपासिद्धत्वं तृतीयो यथा वा
युः प्रत्यक्षः रूपवत्त्वे सति स्पर्शवत्त्वादित्यत्र रूपवत्त्वविशेषणस्य वायावभावेन स्वविशिष्टस्याभावेनापि तथा
त्वेन तस्य स्वरूपासिद्धत्वं निर्वहति विशेषणाभावे विशिष्टस्याप्यभावात् तुरीयो यथा अत्रैव विशेषणवै

सोपाधिको व्याप्यत्वासिद्धः साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः साध्यसमानाधि
करणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वं साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साध
नाव्यापकत्वं पर्वतो धूमवानग्निमत्त्वादित्यत्रार्द्रेन्धनसंयोग उपाधिः यत्र धूमस्तत्रार्द्रेन्धनसं
योग इति साध्यव्यापकता यत्र वह्निस्तत्रार्द्रेन्धनसंयोग इति नास्ति अयोगोलके तदभावात् ॥

शेषं वैपरीत्येन देयः तस्य स्वरूपासिद्धत्वं न विशेष्याभावप्रयुक्तविशिष्टाभावादिति बोध्यं। व्याप्यत्वासि
द्धं निरूपयति सोपाधिक इति ननु कोयमुपाधिरत आह साध्येति ननु किं तर्हि साध्यव्यापकत्वं साधना
व्यापकत्वं चातस्तत्क्रमेण दर्शयति साध्येति लक्ष्ये लक्षणं योजयति यत्र धूम इति उपाधिभेदमादाया
संभववारणाय व्यापकत्वशरीरे अत्यन्तपदं साध्येयं साधनभेदमादाय साधनसोपाधित्ववारणाय साध्य

एम.
३८ कृष्ण

त्य

उपाधिमुपसंहरति एवमिति उक्तरीत्येत्यर्थः सोयमुपाधिस्त्रिविधः केवलसाध्यव्यापकः पक्षधर्मावच्छिन्न
साध्यव्यापकः साधनावच्छिन्नसाध्यव्यापकश्चेति तत्राद्य उपदर्शितः एवं क्रतुत्वेति नो हिंसाऽधर्मज
निका हिंसात्वात्‌ क्रतुबाह्यहिंसावदित्यत्र निषिद्धत्वमुपाधिः तस्य यत्राधर्मसाधनत्वं तत्रां निषिद्धत्वमिति सा
ध्यव्यापकता यत्र हिंसात्वं तत्र निषिद्धत्वमिति नेति निषिद्धत्वमुपाधिः साधनाव्यापकः क्रतुहिंसायां निषि
द्धत्वस्याभावात्‌ न हिंस्यात्सर्वभूतानीति सामान्यवाक्यतः पशुना यजेदित्यादिविशेषवाक्यस्य बली
यस्त्वात्‌ अतो हिंसात्वेनाधर्मसाधनत्वे प्रयोजकमपि न निषिद्धत्वमेवेत्यादिकमपि द्रष्टव्यं द्वितीयो यथा

एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः सोपाधिकत्वाद्वह्निमत्त्वे व्या
प्यत्वासिद्धम् ॥

वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वमुपाधिः तस्य यत्र प्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमि
ति न केवलसाध्यव्यापकत्वं रूपे व्यभिचारात्‌ किंतु द्रव्यत्वलक्षणो यः पक्षधर्मस्तदवच्छिन्नप्रत्यक्ष वहि
त्वं यत्र तत्रोद्भूतरूपवत्त्वमिति पक्षधर्मावच्छिन्नसाध्यव्यापकत्वमेव आत्मनि व्यभिचारवारणाय बहिः
पदं यत्र प्रत्यक्षस्पर्शाश्रयत्वं तत्रोद्भूतरूपवत्त्वमिति साधनाव्यापकत्वं च वायावुद्भूतरूपविरहात्‌
तृतीयो यथा प्रागभावो विनाशी जन्यत्वादित्यत्र भावत्वमुपाधिः तस्य यत्र विनाशित्वं तत्र भा

राधा
न.टी.
३२

भावे

वत्वमिति न केवलसाध्यव्यापकत्वे प्रागभावत्वविरहात् किंतु जन्यत्वरूपसाधनावच्छिन्नसाध्यव्या
पकत्वमेवास्ति यत्र जन्यत्वं तत्र न भावत्वमिति साधनव्यापकत्वं च ध्वंसे भावत्वविरहात् एवं स एष मैत्री
तनयत्वादित्यत्र शाकपाकजत्वमुपाधिः श्यामत्वस्य नीलघटेपि सत्त्वान्न केवलसाध्यव्यापकत्वं
किंतु साधनावच्छिन्नसाध्यव्यापकत्वमेव अत्र हि मैत्रतनये शाकपाकजत्वविरहेण साधनाव्यापकत्वं
किंतु साधनावच्छिन्नसाध्यव्यापकत्वमेवेत्यादिकमपि द्रष्टव्यं अयं वह्निमान् धूमादित्यत्र म
हानसत्वमभावोप्युपाधिः स्यात् तस्य महानसत्व लक्षणपक्षधर्मावच्छिन्नसाध्यव्यापकत्वादिति चेन्न
पक्षधर्मेत्यत्र पक्षदृष्टांतोभयसाधारणधर्मसाधनावच्छिन्नसाध्याव्यापकत्वे सति साध
नाव्यापकत्वमुपाधिरिति तस्य परिष्करणीयत्वात् इदं च लक्षणमाचार्याणामेवाभिहितं लक्ष
णांतरं तु ग्रंथांतरेभ्योवसेयं इत्युपाधिभेदः ननु तावतोपाधिरुपगतः किं तर्हि व्याप्यत्वासि
द्धमत आह वह्निमत्त्वमिति नत्र हेतुः सोपाधित्वादिति इत्यमुपदर्शितदेतवोद्रष्टव्या इत्यः
सिद्धनिरूपणम् ॥

भिन्न

सैवच्छिन्नत्वात् अथ तर्हि गतमुपाधिरनेन लक्षणमिदमिति चेन्न निरवच्छि
न्नसाध्यान्यरव्यापकत्वे सति ५ ।

राम - कृष्ण
३२

बाधितं लक्षयति यस्येति अयं कालात्ययापदिष्टः स्पर्शनेन त्वगिंद्रियेणेत्यर्थः एवं घटः क्षणिकः सत्त्वा
दित्यादिरपि बाधितः तत्रैवायं घट इति प्रत्यभिज्ञारूपप्रत्यक्षेण क्षणिकत्वलक्षणसाध्याभावस्य परिच्छिन्न
त्वादिति इष्टलक्षणमपि दुष्टाभासः यथातिप्रसक्तं लक्षणं व्याप्यत्वासिद्धं न भवति अत्रासाधारणधर्म
एवोपाधिः अव्याप्तलक्षणं तु भागासिद्धं न भवति असंभवयल्लक्षणं तु स्वरूपासिद्धं न भवति सिद्ध
साधनत्वाश्रयासिद्धं न भवति संदिग्धसाध्यपक्षाश्रयत्वात् नव्यास्तु नस्वदूषितत्वेन सिद्धसाधने निग्रहस्य

शाति १८= यस्य साध्याभावः प्रमाणेन निश्चितः स बाधितः यथा वह्निरनुष्णो द्रव्यत्वादिति अत्रानुष्णत्वं साध्यं
तदभावस्तूष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यत इति बाधितत्वं व्याख्यातमनुमानं उपमितिकरणमु
पमानं संज्ञासंज्ञिसंबंधज्ञानमुपमितिः तत्करणं सादृश्यज्ञानम् ॥

नांतरमेवेति वदंति इति सिद्धांतः तृतीयपरिच्छेदमनुमानं विवेच्य समाप्ते अवसरसंगतिमभिप्रेत्यानुमानानंतरमुपमा
नेन निरूपयति उपमितीति उपमितेः करणमुपमानमित्यर्थः तच्च सादृश्यज्ञानमिति निवेदयिष्यते ननूप
मितिरेव का न तत्राह संज्ञेति संज्ञापदं संज्ञी चार्थः तयोः संबंधो वाच्यत्वं तत्प्रकारकं गवयो गवयपद
वाच्य इति ज्ञानमुपमितिरित्यर्थः उपमितित्वं चोपमिनोमीत्यनुभवसिद्धो जातिविशेषः ननूपमिति
करणमुपमानमित्युक्तं किं तदित्यत आह तत्करणमिति सादृश्यप्रकारकं ज्ञानमित्यर्थः उपमितिक

तर्कसंग्रहदीपिकाप्रकाशेऽनुमानपरिच्छेदः ॥

राधा
न-टी
६.

तथाहीति वाक्यार्थस्मरणेर्सिदृशं पश्यतीति गोसदृशं पश्यन्नतिदेशवाक्यार्थं स्मरतीत्यर्थः अयं गवय पदवाच्य इति अभिप्रेतनगवयो गवयपदवाच्य इत्यर्थः तेन भावयोनवेशक्तियहाभावप्रसंग इति दूषणम् पास्तं तथा च गोसादृश्यविशिष्टपिंडज्ञानं करणं अतिदेशवाक्यार्थस्मरणमवांतरव्यापारः उपमितिः फलमिति सारं तच्चोपमानं त्रिविधं सादृश्यविशिष्टपिंडज्ञानमसाधारणधर्मविशिष्टपिंडज्ञानं वैधर्म्यविशिष्टपिंडज्ञानं च तत्राद्यमुक्तमेव द्वितीयं यथा खड्गमृगः कीदृगिति पृष्टे नासिकालसदेकशृंगोतिकोनर

तथाहि कश्चिद्गवयशब्दवाच्यमजानन् कुतश्चिदारण्यकपुरुषाद्गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन्गोसदृशं पश्यति तदनंतरमसौ गवयशब्दवाच्य इत्युपमितिरुत्पद्यते इत्युपमानप्रमाणम् ॥

जातिश्चेति निशम्य कालांतरे तादृशपिंडं पश्यन्नतिदेशवाक्यार्थं स्मरति तदनंतरं खड्गःख ड्गपदवाच्य इत्युपमितिरुत्पद्यते अत्र नासिकालसदेकशृंगमेवासाधारणधर्मः तृतीयं यथा उष्ट्रः कीदृशी इति पृष्टे अश्वादिवत्समानपृष्ठो न ह्रस्वग्रीवशरीरश्चेत्युत्तरे दत्ते कालांतरेणानतिपिंडदर्शनाद्वैधर्म्यविशिष्टपिंडज्ञानं ततोऽतिदेशवाक्यार्थस्मरणं ततः उष्ट्र उष्ट्रपदवाच्य इत्युपमितिरुत्पद्यते इत्याहुः ननु आप्तवाक्यजन्यत्वाच्छाब्दबोधएवास्त्विति चेन्न उपमिनोमीत्यनुव्यवसायस्यापलापप्रसंगादिति सर्वे रमणीयं

इति श्री॰ [illegible] उपमानविवेचनम् ॥

रा.
६. कृष्ण

एवमस्य संगतिमभिप्रेत्यो(?)पमानानंतरं शब्दं निरूपयति आप्तेति। शब्द इति। शब्दः प्रमाणमित्यर्थः। भ्रांतविप्र-
लंभकयोर्वाक्यस्य शब्दप्रमाणत्ववारणायाप्तेति। ननु कोयमाप्त इत्यत आह आप्तस्त्विति। यथार्थवक्ता यथा-
भूताबाधितार्थोपदेष्टा। ननु वाक्यं किमत आह वाक्यमिति। पदलक्षयति(?) शक्तमिति। अस्मात्पदादयमर्थो
बोद्धव्य इति निरूपकतासंबंधेन शक्तिविशिष्टमित्यर्थः। अथ शक्तिर्निरूप्यते ननु शक्तिरेव केत्यत आह अस्मा-
दिति घटपदात् घटरूपोर्थो बोद्धव्य इतीश्वरेच्छैव शक्तिरित्यर्थः। अर्थस्मृत्यनुकूलपदपदार्थसंबंधत्वं तल्ल-
क्षणं सा च पदार्थांतरमिति मीमांसकाः। तन्न मानाभावात्। आधुनिकेनाप्येकादशेह्नि पिता नाम

आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः। यथा गामानये
ति। शक्तं पदं अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः ॥ ॥

कुर्यादितीश्वरेच्छास्त्येव। नव्यास्तु आधुनिकसंकेतिते डित्थादिपदेपीश्वरेच्छाया अभावादिच्छैव शक्तिरिति
भणंति। शक्तिग्रहश्च वृद्धव्यवहाराद्भवति। तथाहि उत्तमवृद्धेन घटमानयेति वाक्ये प्रयुक्ते मध्यमवृद्धो घ-
टमानयति तदवलोकयन्पार्श्वस्थो बालोन्वयव्यतिरेकाभ्यां घटमानयेति वाक्यजन्यत्वं मध्यमवृद्धप्रवृत्ते-
र्ज्ञानं निश्चिनोति ततो गामानय घटं नयेति वाक्यात् आवापोद्वापाभ्यां घटपदस्य घटत्वविशिष्टे
शक्तिः गोपदस्य गोत्वविशिष्टे इति जानाति। एवमसति बाधके धातुप्रकृतिप्रत्ययादीनां शक्तिग्र

हो व्याकरणाद्भवति क्वचिद्वयमानोपि तदन्तं शक्तिग्राहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च
वाक्यशेषाद्विवृतेर्वदंतिसान्निध्यतः सिद्धपदस्य वृद्धा इति यवमयश्चरुर्भवतीत्यत्रयवपदस्य दीर्घशूकवि
न.सी. शेषवसंतेसर्वमस्यानां जायतेपत्रशातनं मोदमानाश्चतिष्ठंतियवाः कणिशशालिन इतिवाक्यशेषाद्व्य
७१ क्तिरवध्यर्यंते हस्ती हस्तिनीत्यस्य गजो हस्तिनीति विवरणाद्धस्तिपदस्य गजे शक्तिग्रहः विवरणं च समाना
र्थबोधकपदांतरेण तदर्थकथनं सिद्धमेव विवृणोतिरित्युच्यते इह विकचकमलेरोलंबश्चमरद्भ्रमरइत्यादौ प्रसिद्धपद
सांनिध्याद्भ्रमरादेः शक्तिग्रहः शेषस्तु गमं नवास्तु गवादिपदानां व्यक्तावेव शक्तिः ननु जातावि
पि गोत्वादितिमेनिरे मीमांसकास्तु विशेषणत्वेन गोत्वादेर्वक्ष्यमाणमपुपस्थितत्वाद्गवादिपदानां गो
दा६ त्वावेव शक्तिः व्यक्तिलाभस्तु गोत्वमाश्रयं विनानुपपत्तेरित्यानुपपत्तिमानादित्याहुः तदसत् इह कोकिलः पंचमं
कलमनोरथदायिनी करुणाकोवेतीतिसिद्धवाक्ये पामराणामपि व्युत्पत्तिदर्शनात् चैत्रःपचतीत्य
दावाख्यातस्यकर्तरि शक्तिमिति वैयाकरणाः ननु गोत्वात् किं तक्तत्वाव तथा चगवादिशक्तिग्रहे
गृहीतशक्तिगवादिशब्दस्य ज्ञानं वाक्यरणीयं जन्यपदार्थस्मरणं वा तत्रव्यापारः आकांक्षायोग्य न्या.
तासन्निधितात्पर्यज्ञानानिसहकारीणि शाब्दबोधः फलमितिसारम् इतिशक्तिवादः पदं च तद्वै ७१
धं यौगिकं रूढयौगिकरूढं यौगिकरूढं च अवयवशक्तिर्योगः अवयवमात्रशक्तिकं यौगिकं
मू० टु९० ॥ तदसत् विनाप्याक्षेपं गौरस्तीत्यनेन व्यक्तिप्रतीतेः प्रभाकरास्तु गवादिपदानामानयनादिरूपकार्यान्वितेगवादौ शक्तिः सर्वत्रकार्यवाक्याव व्युत्पत्तेः भू. तत्रेदंघट इत्यादिसिद्धवाक्येषु न व्युत्पत्तिरित्याऽऽ ६९

कथापाचकादिपदं समुदायशक्ती रूढिः समुदायमात्रशक्तिकं रूढं यथा पंकजादिपदं अवयवशक्त्या
पंकत्वेन रूपेण कमलमेव बोधयति समुदायशक्त्या च कमलत्वेन रूपेणात एव समुदायशक्तिरावश्य-
की यौगिकार्थरूढ्यर्थयोः स्वातंत्र्येण बोधकं यौगिकरूढं यथोद्भिज्जादिपदं शक्तिरिव लक्षणापि पद
स्य वृत्तिः अथ केयं लक्षणा शक्यसंबंधो लक्षणा वर्त्तते च गंगायां घोष इत्यत्र गंगापदशक्यप्रवाह
संबंधस्तीरे लक्षणाबीजं च तात्पर्यानुपपत्तिः अत एव प्रवाहे घोषतात्पर्यानुपपत्ते स्तीरे लक्षणा
सेत्स्यति तात्पर्यं च वक्तुरिच्छा वक्त्रा चापि संधायर्पिता तेन मौनादावव्याप्तिः प्रत्युक्ता सा च लक्षणा
हदजह त्रिविधा जहदजहज्जहल्लक्षणाभेदात् यत्रान्वितो न वाच्यार्थस्तत्राद्या यथा मंचाः क्रोशंति गंगा
यां घोष इत्यादौ यत्र वाच्यार्थोऽन्वयस्तत्र द्वितीयका यथा छत्रिणो यांतीत्यादौ अछत्रिणां तदित
रेषां च गमनेनान्वयः यत्र वाच्यैकदेशबाधेनैकदेशान्वयस्तत्र तृतीया यथा स एवं घटोस्तीत्यादौ अ
त्र तद्देशकालविशिष्टस्य बाधः तत्पुरुषे राजपुरुष इत्यत्र राजपदस्य राजसंबंधिनि लक्षणा बहु
व्रीहावपि लक्षणा यथा चित्रगुरित्यत्र गोपदे गोस्वामिलक्षकं चित्रपदं तात्पर्यग्राहकं द्वंद्वे धवख
दिरौ छिंधीत्यत्र धवखदिरयोस्तदर्थोपकारकतयाभासमानद्विवचनार्थद्वित्वलक्षणा कर्मधार

चित्रामिनु २४

राधा
त-टी
८२

येन नीलोत्पलमित्यादौ नलक्षणा । निषादस्थपतिं याजयेदित्यत्रापि कर्मधारयेन लक्षणा । वेद
बोधितयाजनानुपपत्त्याद्युक्तोपयुक्त वेदे तस्याधिकारस्य कल्पनात् स्त्रीशूद्रौनाधीयतामिति वेदस्यनि
षादातिरिक्तस्यइपरत्वात् दध्नाक्ष्णोदयेत्यत्र द्वितीयालोपस्थले दधिपदस्य दधिकर्मत्वेलक्षणा ।
घटंजानामीत्यादावाख्यातस्यात्मनि लक्षणा । रथोगच्छतीत्यादावाख्यातस्य गमनानुकूलव्यापा
रे लक्षणा । प्रजपतीत्यादौ जपार्थकधातोः प्रकृष्टजपे लक्षणा । उपसर्गस्य तात्पर्यग्राहक इति संक्षे
पः गच्छगच्छसि चेत्कान्त पंथानः सन्तु ते शिवा ममापि जन्म तत्रैव भूयाद्यत्र गतो भवानित्यत्र
तत्र मां त्वं मम प्राणवियोगो भविष्यतीति बोधार्थं जनानां व्यहृत्यतत्र मेऽच्छन्नालंकारिकाः तन्न लक्षणां
तदेतभावात् अथाग्निर्माणवक इत्यत्र माणवके ग्निसादृश्यबोधार्थं गौणीवृत्तिरूपतत्रमेवेति मावम
स्थाः तस्या लक्ष्यमाणगुणकत्वेन लक्षणानतिरिक्तत्वात् इति लक्षणाव्यवस्था ॥ ॥

राम-कृष्ण
८२

चती

प्राद् १४ म्

अत्र वक्तारेण तात्पर्यज्ञानं समुन्नीयते तथा चाकांक्षायोग्यतातात्पर्यज्ञानानि सन्निधिश्च शाब्द
निदानमित्यर्थः तेनाकांक्षादिविपर्यये शाब्दविपर्ययेपि नो हानिः आकांक्षामुत्पादयति पदस्येति
घटादिलक्षणपदस्य पदान्तरं विभक्तिपदं तस्य व्यतिरेकोभावः तत्प्रयुक्तं यो ज्यं अन्वयाननुभाव
कत्वं शाब्दबोधानुपधायकत्वमाकांक्षेत्यर्थः एवं घानयपदाख्यातपदयोः गामानयेत्यादिस्थले ति उक्त
घोस्त्रइष्टव्यं योग्यतामाह अर्थेति पयसा सिंचतीत्यत्र पयसि सेककरणत्वस्याबाधितत्वात् योग्यत्वं सन्निधिमु
त्पादयति पदानामिति अविलंबेन पदोपस्थितिः सन्निधिः क्वचिदुच्चारणं तदुपयोगि नितात्पर्यं तेन मीति

आकांक्षायोग्यतासन्निधिश्च [illegible] ज्ञानहेतुः पदस्य पदान्तरव्यतिरे[illegible]प्रयुक्तान्वयाननुभाव
कत्वमाकांक्षा अर्थाबाधो योग्यता पदानामविलंबेनोच्चारणं सन्निधिः

श्लोकादौ तदभावेपि
नश्लोकार्थे कलंकावकाशः अत्र वैयाकरणाः अविलंबेन पदोपस्थितिर्न संपद्यते तत्र वर्णाभि
न पदानुभवजनितसंस्कारस्यायोगात् वर्णानामाशुतरविनाशित्वेन पदस्यैवासिद्धेः सतरां तदनुभव
स्य पदे स्फोटात्मकं पदं स्वीक्रियते तदप्रविष्टमेवास्माकं मतमित्याहुः तच्च न्यायामदे तत्तद्वर्णानुभ
वजनितसंस्कारसहकृतादेव सहकारिबलात् तत्तत्लेकपोतन्यायेन समूहालंबनात्मकपदस्मरणसामंजस्ये
स्फोटस्याकिंचित्करत्वात् इति स्फोटवादः सैंधवमानयेत्यादौ तात्पर्यज्ञानादेव वक्तृचिलवणास्यवक्तृवि
हस्वस्वबोधानस्योपकरणत्वं संजायते इति नानार्थानुरोधात्प्रकरणादिकं तात्पर्यग्राहकं द्वारमित्या

राधा

त. दी. ४३

आकांक्षादिमद्वाक्यस्यागमप्रमाणत्वं निषेधयति तथा चेति आकांक्षादिकं शाब्दहेतुरित्युक्तं चेत्य-
र्थः अनाकांक्षादिमदुदाहरणं दर्शयति गौरश्व इति वाक्यं विभजते वाक्यमिति ईश्वरोक्तत्वादिति वेदः पौरु-
षेयो वाक्यत्वात् भारतादिवदित्यनुमानात् तत्सिद्धिः ननु सर्वप्रमाणकर्तृकत्वमुपाधिः तस्य भरतादौ
साध्यव्यापकत्वात् वेदे साधनाव्यापकत्वाच्चेति माभाषिष्ठाः वेदेऽपि तस्य सत्त्वात् अतो ब्रह्मा वेदकर्ते-
त्याद्युपपिकिं वदंती सर्वमेवेत्यर्थः तेनानाप्तोक्तत्वज्ञानप्रयुक्तं वेदस्याप्रामाण्यमपि निरस्तमिति: स्मृतिपुराणे

तस्माच्च आकांक्षादिरहितं वाक्यमप्रमाणं यथा गौरश्वः पुरुषो हस्तीति न प्रमाणमाकांक्षा-
विरहात् अग्निना सिंचेदिति वाक्यं न प्रमाणं योग्यताविरहात् प्रहरे प्रहरे असहोच्चारितानि
गामानयेत्यादिपदानि न प्रमाणं सान्निध्याभावात् वाक्यं द्विविधं वैदिकं लौकिकं च वै-
दिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणं लौकिकं त्वाप्तोक्तं प्रमाणमन्यदप्रमाणं वाक्यार्थज्ञा-
नं शाब्दज्ञानं तत्करणं शब्दः इति यथार्थानुभवो निरूपितः

तिहासाचाराणां वेदमूलकत्वेन प्रामाण्यं तन्मूलवेदानामधुनानुपलभ्यत्वेन शाखा वा काचिदुच्छिन्ने वे-
ति कल्प्यते केचित्तु यच्चैव वेदमूलकत्वे दृष्टान्तः सर्वप्रामाण्यमन्यथा अस्मदादिकल्पितवाक्यानामपि
तदापत्तिः न च यत्र कर्तृस्मृतिप्रणीतत्वं तत्र प्रामाण्यं बृहस्पतिप्रणीतत्वात् नास्तिकसूत्राणामपि तदापत्ते-
रिति वाच्यं ननु नैतावता शाब्दसामग्रीप्रपंचिता प्रमाविभाजकवाक्यशाब्दस्योपपत्तिदृष्टेन तत्कृतो

कृष्ण ४३

नप्रदर्शितत्वात् आह वाक्यार्थेति। शाब्दत्वेन शाब्दान्वयित्वेमीत्युभयसिद्धा जातिः शाब्दबोधक्रमो यथा।
चैत्रो ग्रामं गच्छतीत्यत्र ग्रामकर्मकगमनानुकूलवर्त्तमानकृतिमानिति शाब्दबोधः द्वितीयायाः क
र्मत्वमर्थः धातोर्गमनं अनुकूलत्वं च संसर्गमर्यादया भासते लटो वर्त्तमानत्वं आख्यातस्य कृतिः तं कृति
त्संसर्गश्च संसर्गमर्यादया भासते रथो गच्छतीत्यत्र गमनानुकूलव्यापारवान् रथ इति शाब्दबोधः
स्नात्वा गच्छतीत्यत्र गमनप्रागभावकालीनस्नानकर्तृगमनानुकूलवर्त्तमानकृतिमानिति शा
ब्दबोधः क्त्वाप्रत्ययस्य कर्ता पूर्वकालीनत्वं चार्थः भोक्तुं गच्छतीत्यत्र भोजनप्रागभावकालीन
भोजनविषयकेच्छावान् गच्छतीत्यर्थः चैत्रेण पच्यते तण्डुल इत्यत्र चैत्रवृत्तिकृतिजन्यपाकजन्य
फलशाली तण्डुल इति शाब्दबोधः वृत्तित्वं संसर्गबलल्लभ्यं जन्यत्वं च तथा धातोः पाकः जन्यत्वं
संसर्गबललभ्यं कर्मणः फलं आत्मनेपदस्य शालित्वं क्वचिदात्मनेपदार्थो न भासते च चैत्रेण
चैत्र४४ सुप्यत इत्यत्र चैत्रवृत्तिकृतिजन्यः स्वाप इति बोधः चैत्रः पचतीत्यत्र वर्त्तमानप्रागभावप्रतियो
ग्युत्पत्तिकपाकजनककृतिमांश्चैत्र इत्यर्थः गामानयेत्यत्र गोकर्मकमदिच्छाविषयानयना
नुकूलकृतिमांस्त्वमित्यर्थः ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र कृतिसाध्यबलवदनिष्टाज
नकेष्टसाधनज्योतिष्टोमनामयागकः स्वर्गकाम इत्यर्थः एवमेव सर्वे प्रथमान्तस्य विशेष्य

तंडुलमित्यत्र १४

राधा

न. टी. ४४

कः शाब्दबोधो ज्ञेयः वैयाकरणास्तु धात्वर्थमुख्यविशेष्यक(क)मेव शाब्दबोधः यथा चैत्रः पचतीत्यत्र तिङ्ल
निष्ठविक्लित्त्यनुकूलचैत्रकर्तृकः पाक इति बोध इत्याहुः सर्वत्र एवकाराः संति ते चेत्यत्र क्रियायुक्तैवका ११
रस्यात्यन्तायोगव्यवच्छेदोऽर्थः शंखः पांडुर एवेत्यत्र विशेषणयुक्तैवकारस्यायोगव्यवच्छेदोऽर्थः
इति संक्षेपः इदमपि बोध्यं लटो वर्तमानत्वमर्थः लिटोऽतीतपरोक्षत्वं लुटो भविष्यानद्यतनत्वं लृ
टो भविष्यत्वं लोटो वक्तृवांछाविषयत्वं लुङो भूतानद्यतनत्वं लिङ् द्विधा विधिलिङ् आशीर्लि
ङ् च तत्र विधिलिङः कृतिसाध्यत्वे सति बलवदनिष्टाजनकेष्टसाधनत्वं आशीर्लिङो वक्तृवांछा
विषयत्वं लङो भूतत्वं लृङोऽतीतत्वे भविष्यत्वं चेति शाब्दक्रम निदर्शने शाब्दमुपसंहरति त
करणमिति सोऽयं शब्दस्त्रिविधः विधिमंत्रार्थवादभेदात् तत्राद्यो विध्यभिधायकप्रत्ययघटितं
वाक्यं स च प्रत्ययः लिङ् लिट् तव्यत्कृत्यप्रत्ययरूपः भवति ज्योतिष्टोमेन स्वर्गकामो यजेतेति
वाक्यं तथा यत्र लिङादिः तादृशप्रत्ययः विध्यभिधायकेत्यत्राभिधेयो विधिर्ज्ञेयः स च प्रयत्नजनक
चिकीर्षाजनकज्ञानविषयः कृतिसाध्येष्टसाधनत्वमेव सः जानाति इच्छति यतते इति नियमात् राम. कृष्ण ४४
ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिनित्यस्थले अहरहः संध्यामुपासीत यावज्जीवमग्निहोत्रं जु
हुयादित्यादिनित्यस्थले नैमित्तकस्थले च चिकीर्षाद्वारा कृतिसाध्येष्टसाधनताज्ञानं प्रवृत्तिं प्रति कं

रणां नित्यमिति संध्यावंदनादौ प्रत्यवायपरिहारादिकमिष्टं कल्प्यते नैष्फल्यं जं भवयेदित्यादौ नञा
विध्यर्थस्याभावो बोध्यते अत्र प्राभाकराः कार्यत्वं विध्यर्थः स्वहितनि[ष्प]कृतिसाध्यताज्ञानं वीजं ते
नकृत्यसाध्येन प्रवृत्तिः न तु विषभक्षणादौ प्रवृत्तिप्रसंग इति चेन्न द[illegible]यायिनः इष्टसाधनतालिंगककृ
तिसाध्यतानुमितिरिष्टसाधनताज्ञानकालीनकृतिसाध्यताज्ञानं वा काम्यस्थले प्रवर्तकमतो नो
क्त दोषः नित्यस्थले चाहमिदानींतनकृतिसाध्यसंध्यावंदनकः ब्राह्मणत्वे सति विहितसंध्याकाली
नशौचादिमत्वादिति शौचादिमत्प्रतिसंधानजन्यकृतिसाध्यताज्ञानमिति समादधते अथानुष्ठा
न इति चेत्सर्वविशेषणावत्प्रतिसंधानजन्यमेव कृतिसाध्यताज्ञानं तु गतं स्वपुरुषः नत्र काम्यस्थले
इष्टैव विशेषणं नित्यस्थले च शौचादिकमेवे तत्स्थानापयंति नेदं शोभनं अलंबीयस्त्वात् सोपि विधि
स्त्रिधा अपूर्वनियमपरिसंख्याभेदात् तत्र केवलमप्राप्तौ विधिराद्यः यथा स्वर्गकामो यजेतेत्यादौ अ
त्र यजनादेरप्राप्तत्वात् यत्रोभयोः प्राप्तावेको नियम्यते तत्र द्वितीयः यथा व्रीहीनवहन्यादि
त्यादौ अत्र व्रीहीणां नखविदलनमुशलावहननप्राप्तौ मुशलावहननमेव नियम्यते सर्वत्र
प्राप्तस्यैकचिहियिस्तृतीयः यथा पंचपंचनखा भक्ष्या इत्यत्र सर्वेषां पंचनखानां भक्षणप्राप्तौ पंच
व पंचनखा भक्ष्या इति विधीयते प्राशकः शल्लकी गोधा खड्गी कूर्मः शशश्च पंचम इति पंचनखान्ते

ज्ञानन्तु मनमानादेव संपनीपयते न यादि ... मानयेत्यादिपदानि स्मारितार्थसंसर्ग

राघो याः इति विधिविशेषः अर्थवादस्त्रिधा गुणवादोऽनुवादो भूतार्थवादश्चेति तत्राद्यो यथा आदित्यो
त.टी. यूपो यजमानः प्रस्तर इति प्रमाणान्तरेण निर्णीतस्यार्थस्य ज्ञापकोऽनुवादः यथाग्निर्हिमस्य भेषजमि
४५ ति भूतकालेपि तद्ज्ञापको भूतार्थवादः यथा जरायामप्ययं स्मरत्यर्थवादः मंत्रस्त्वापः पुनन्त्वित्या
दि इति मंत्रवादः ननु शाब्देन प्रमाणेन संसर्गं वेत्ति आकांक्षादिमत्पदकदंबकत्वान्महाकाव्यवदिति
चेन्नानुमितिविलक्षणस्य शाब्दज्ञानस्य प्रतीत्यनुभवसाक्षिकत्वात्तस्यापलपितुमशक्यत्वात् यथार्था
पत्तिरपि प्रमाणान्तरमस्ति तथाहि पीनो देवदत्तो दिवा न भुंक्ते इति दृष्टे श्रुते वा दिवाभुंजानस्य पीनत्वं
रात्रिभोजनं विनानुपपन्नमित्युपपत्तिर्भवति इयमेवार्थापत्तिः ननु अयं देवदत्तो रात्रौ भुंक्ते इत्य
नुभवो जायत इति मैवं मंस्थाः अयं देवदत्तो रात्रौ भुंक्ते दिवाऽभुंजानत्वे सति पीनत्वादिति केवलव्यतिरेक्य
नुमानेनैव तत्सिद्धौ तस्याः किंचित्करत्वात् अनुपलब्धेः प्रमाणत्वं निराकृतमेव प्राक् संभवोपि न प्रमा
णान्तरं तथाहि द्विविधः संभावनात्मको निर्णयात्मकश्चेति तत्राद्यो न प्रमाणं यथा ब्राह्मणे चतु
र्दशविद्याभिज्ञत्वं संभवतीति चतुर्दशविद्याश्च ऋग्वेदश्च यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षाक
ल्पो व्याकरणं छंदो ज्योतिर्निरुक्तयः मीमांसा तर्कश्च सांख्यं च पुराणं धर्मशास्त्रकं विद्याश्चतुर्दशैताः सु राम कृष्ण
प्रकाशा निदानकाः इति वेदान्तस्य मीमांसायामन्तर्भावः वैशेषिकस्य तर्के सांख्ये पातंजलिपाशुपत ४५

वैस्रवरामायणभारतादीनां धर्मशास्त्रे पुराणांच ब्राह्मपाद्मस्कांदमार्कंडेयशैववैस्रवगाणेशसौ
रभागवतभविष्यब्रह्मवैवर्तलैंगवामनवाराहकौर्म्ममात्स्यगारुडब्रह्मांडभेदादष्टादशधा वासिष्ठ
लैंगनारसिंहनंदीयनारदीयवामनीयहंसनन्दसारदीवाससशिवधर्म्मकापिलमानववाहणरेणुक
वायवीयमाहेश्वरमारीचभार्गवादिभेदादुपपुराणानिबद्धविधानियाज्ञवल्क्यविष्णुयमांगि
रसवसिष्ठदक्षसंवर्तशातातपपाराशरगौतमशंखलिखितहारीतापस्तंबोशनसकात्यायनवा
त्स्यायनवृद्धव्यासदेवलनारदपैठीनसिप्रभृतिकृतानि धर्म्मशास्त्राणि तस्माच्चतुर्द्दशैव नन्वायु
र्वेदधनुर्वेदगांधर्ववेदार्थशास्त्रभेदादुपवेदचतुष्टयमप्यस्ति कामशास्त्रस्यायुर्वेदेंतर्भावः नी
तिशास्त्रशिल्पशास्त्राश्वशास्त्रगजशास्त्रसूपकारशास्त्रचतुःषष्टिकलाशास्त्राणामर्थशास्त्रे
न्तर्भावः तस्मादष्टादशैव विद्या इति चेत्स्यादेवमपि शतं पंचाशदिति निर्णयात्मक संभवोऽप्रमा
णेनान्तर्भूतः इदं वटे यक्षस्तिष्ठतीत्यैतिह्यमपि न प्रमाणांतरं किं त्वज्ञातमूलवक्तृकः शाब्दः चेष्टा
पि न प्रमाणांतरं किं त्वनुमानप्रयोजकं केवलशाब्दबोधैव प्रमाणमिति सिद्धं एतेनानुपलब्धि
कादि प्रमाणांतरमपास्तं इति बोध्यं इति श्री सिद्धान्तचंद्रोदये तृतीयपरिच्छेदः॥८॥ द्वखंडं समाप्तं

राधा ज्ञाननिष्ठं तद्वतितत्प्रकारकत्वात्मकं प्रामाण्यं स्वतो ग्राह्यं मिति किं वदंती अस्यार्थः॥ परतो वेति वि
प्रतिपत्तिः तत्र ज्ञानप्रामाण्ये च तदप्रामाण्यग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यमिदमेव स्वतो ग्राह्य
नदी· मिति किं वदंती अस्यार्थः ज्ञानप्रामाण्यं ज्ञाननिष्ठाप्रामाण्यग्राहकयायावतीज्ञानग्राहिकानुव्यवसाया
४९ दिरूपासामग्रीतद्ग्राह्यमिति इदंवैज्ञत्वं स्वतस्त्वमुच्यते यथशुज्ञाने ग्रिरयमिति भ्रमः यत्र्वादिदंज्ञा
नमप्रमेति ज्ञाने ततो द्वितीयज्ञाने प्रमेति प्रमात्वत्तृतीयज्ञानग्राह्यत्वस्यानुव्यवसायगतप्रामाण्ये सत्वे
पि तृतीयज्ञानस्य व्यवसायनिष्ठाप्रामाण्यग्राहकत्वेन प्रामाण्यग्राहकत्वाभावात् स्वतस्त्वेनसंताव
दीति अतस्तादिति प्रामाण्यग्राहकयावदपवतत्पदार्थः यत्रायं घटइति प्रमानन्तरमिदं ज्ञानमप्रमेत्यप्रमातत्त्व
स्थलीयपटलेयं भ्रम इति ज्ञाने प्रकारत्वस्य स्थलीयपटलेऽसत्वत्वतो ग्राह्यत्वस्य प्रामाण्येऽसत्वाद्वाथः अतो
प्रमाण्यग्राहकेति सिद्धसाधनवारणाय यावदिति नन्वनुव्यवसायेन कथं प्रामाण्यं गृह्यत इति
चेत् घटमहं जानामीत्यनुव्यवसायो घटं घटत्वे समवायं च विषयीकुर्वन्ज्ञानात्मनि प्रकारीभूतं घट राम· कृष्ण
मात्मानं तत्संबंधिनं व्यवसायं च विषयीकरोति एवं सति प्रोहितिकप्रकारसंबंधस्यैव प्रमापदार्थ ४९
त्वेन स्वतस्त्वं प्रामाण्यं गृह्णीतीति मणरादिमिश्राः। अनुव्यवसायात्मकमेव सर्वं ज्ञानं तत्वं स्वप्रका

मान

णमितिमात्रमेवं विषयत्वाद्विप्रवीत्युच्यते स्वप्रकाशसामर्थ्यादेव स्वात्मानमिव स्ववृत्तिप्रामाण्यं
स्वत एव गृह्णातीति प्राभाकराः । अयं घट इति ज्ञानानन्तरं घटे ज्ञातता नाम फलं भवति ततो ज्ञातो घट
इति तत्प्रत्यक्षं पश्चात् तया ज्ञातताऽनुमानस्यातीन्द्रियत्वात् ज्ञानेन तन्निष्ठं प्रामाण्यं चायं घटत्वप्रकारकज्ञानवान् ।
विषयकं = घटत्वप्रकारकज्ञाततावत्त्वादित्यनुमीयते तस्मात्स्वत एव प्रामाण्यं गृह्यते स्वतो ग्राह्यत्वं च ज्ञानग्राह
कातिरिक्तानपेक्षत्वमिति भाट्टाः तन्नेति गौतमीयाः तत्र प्रथमं प्रमाणाय । इदं जलमिति ज्ञानानन्तरम
नभ्यासदशायां समुत्पन्ने ज्ञाने प्रमाणं वेति संदेहो न स्यादिति न च स्वं प्रामाण्यस्य निश्चितत्वात् स्व
प्रकाशत्वमपि दृष्टं चेति चात्तथादिना स्वात्मनो विषयीकर्तुमशक्यं ज्ञानविषयतातिरिक्तज्ञानता मान् ५
नायोमानाभावात् अतो निषेधकोटिरेव वलीयसीत्यलमतितर्ककर्कशविचारभारधारणेन ।
शिष्णूनां अथ कथं परतः प्रामाण्यग्रहणमिति चेदुच्यते प्रथमं जलजलत्वयोर्निर्विकल्पके
ततमिदं जलमिति विशिष्टज्ञानेन तदुत्पत्तेः प्रवृत्तिस्ततो जललाभस्तदनन्तरं पूर्वोत्पन्ने जल
ज्ञाने प्रमासमर्थप्रवृत्तिजनकत्वात् यन्नैवं तन्नैवं यथाऽप्रमेति व्यतिरेकिणा यथा घटज्ञानमि

त.दी. ति अन्वयदृष्टांतस्यापि संभवेनान्वयव्यतिरेकिणा वा प्रामाण्यं निर्धार्य्यते इति ज्ञप्तौ परतस्त्वं प्रमाया

८० त गुणजन्यत्वादुत्पत्तौ परतस्त्वं गुणस्य प्रमासाधारणकारणत्वात् यथा प्रत्यक्षे सन्निकर्षः अनुमितौ वि-

शिष्टपरामर्शः उपमितौ सादृश्यज्ञानं शाब्दे योग्यताज्ञानं एवमप्रामाण्यमपि परतोऽस्मन्मते इदं च मीमां-

सकानामपि संमतं परंतु वर्त्तिनि प्रकाराभावस्यानुव्यवसायेनानुपस्थितत्वात् अप्रमायाः पित्तमं-

डूकवसाञ्जनचाकचिक्यदूरत्वादिदोषजन्यत्वादुत्पत्तौ परतस्त्वं दोषस्याप्रमासाधारणकारणत्वादिति।

लों विस्तरः इति प्रामाण्यवादः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अथ यथार्थानुभवं विभजते अयथार्थेति संशयं लक्षयति एकस्मिन्निति एकस्मिन्धर्मिणि एकस्मि
न्नेव पुरोवर्तिनि पदार्थे विरुद्धा व्यधिकरणा ये नानाधर्माः स्थाणुत्वपुरुषत्वादयस्तेषां वैशिष्ट्यं सम्ब
न्धः तदवगाहि ज्ञानं संशय इत्यर्थः घटपटाविति समूहालम्बनज्ञानस्य पटत्वघटत्वरूपविरुद्धना
नाधर्मवैशिष्ट्यावगाहित्वादतिप्रसङ्गवारणाय एकस्मिन्निति घटः पृथिवीति ज्ञानस्यैकस्मिन्धर्मिणि
घटे घटत्वपृथिवीत्वरूपनानाधर्मवैशिष्ट्यावगाहित्वादतिप्रसक्तिरतो विरुद्धेति घटत्वविरुद्धपटत्ववा
न्घट इति ज्ञानेऽतिप्रसक्तिवारणाय नानेति उदाहरति यथेति सोऽत्रिविधः साधारणधर्मधीजन्योऽ

अथ यथार्थानुभवस्त्रिधा संशयविपर्ययतर्कभेदात् एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यज्ञानं
संशयः यथा स्थाणुर्वा पुरुषो वेति मिथ्याज्ञानं विपर्ययः यथा शुक्ताविदं रजतमिति ॥ ॥

धी

साधारणधर्मधीजन्यो विप्रतिपत्तिजन्यश्च विशेषादर्शने कोटिद्वयस्मरणं संशयमात्रे हेतुः तत्राद्यः
प्रदर्शितः उच्चैस्त्वं तत्र साधारणधर्मः स्थाणुत्वनिश्चायकवक्रकोटरादिमत्त्वं पुरुषत्वनिश्चायककक
रादिमत्त्वं वा विशेषः स्थाणुत्वपुरुषत्वे च कोटिद्वये द्वितीयो यथा शब्दत्वं नित्यानित्यव्यावृत्ति शब्दमा
त्रवृत्तीति ज्ञाने शब्दो नित्यो न वेति संशयः तृतीयो यथा श्यामा गौपस्वेतो याप्यं परत्वो ग्राह्यं वेति संश
यः विपर्ययं लक्षयति मिथ्येति ॥ ॥ ॥ ॥ ॥ ॥ ॥

तर्कं लक्षयति व्याप्येति अत्र वह्न्यभावो व्याप्यः धूमाभावो व्यापकः उदाहरति यथेति यद्यपि तर्क
त॰टी॰ स्य विपर्ययात्मकत्वेन पृथग्विभागोनुचितः तथापि प्रमाणानुग्राहकत्वात्स उचित इति बोध्यं स्वम
९२ स्तु प्रतीतहृदिरं तद्देशयोः संयोमनसि स्थितेहस्तविशेषेण यान्तदेषेणावाजन्यते सच विपर्यय
एव इति श्रीसिद्धांतचंद्रोदये तृतीयपरिच्छेदे यथार्थानुभववर्णनं स्मृतिं विभजते स्मृतिरपी
ति प्रमाजन्येति स्वजन्यसंस्कारसंबंधेन प्रमायाः स्मृतिकारणत्वमिति भावः अप्रमाजन्येति इदं
रजतमित्यप्रमातो रजतत्वेन शुक्तेः स्मरणमयथार्थं इति बुद्धिं निरूप्य सुखं निरूपयति सर्वे

व्याप्यारोपेण व्यापकारोपस्तर्कः यथा यदि वह्निर्न स्यात्तर्हि धूमोपि न स्यादिति स्मृतिरपि द्विधा
यथार्थायथार्था च प्रमाजन्या यथार्था अप्रमाजन्यायथार्था सर्वेषामनुकूलवेदनी
यं सुखं प्रतिकूलवेदनीयं दुःखम् ॥

षामिति सर्वात्मनानुकूल मिति वेद्यं यत्तत्सुखमित्यर्थः
इष्टत्वमनुकूलत्वं अदृष्टसुखीत्यनुभवसिद्धसुखत्वजातिमद्धर्ममात्रासाधारणकारणगुणो वा सु
खं तच्चतुर्विधं वैषयिकाभिमानिकमानोरथिकाभ्यासिकभेदात् विषयसात्म्यात्कारजं प्रथमं
राज्याधिपत्योऽहमित्यहंवादिजं द्वितीयं विषयध्यानजं तृतीयं नमस्कारोपाध्यायादिजं तुरीयं दुः
खमाह प्रतिकूलेति प्रतिकूलत्वं द्विष्टत्वं दुःखत्वजातिमद्धर्ममात्रासाधारणकारणगुणो वा दुःखं

९८ राम॰

इच्छां निरूपयति इच्छेति काम इति पर्यायः इच्छात्ववतीच्छा सा द्विधा फलेच्छा उपायेच्छा च फलं सुखादि
कं उपायो यागादिः द्वेषं निरूपयति क्रोध इति द्वेष्मीत्यनुभवसिद्धद्वेषत्वजातिमान् दुःखसाधनताज्ञानज
न्यो गुणो वा द्वेषः प्रयत्नं निरूपयति कृतिरिति प्रयत्नत्वजातिमान् प्रयत्नः स त्रिविधः प्रवृत्तिनिवृत्ति
जीवनयोनिभेदात् इच्छाजन्यो गुणः प्रवृत्तिः द्वेषजन्यो गुणो निवृत्तिः जीवनादृष्टजन्यो गुणो जीवन
योनिः स च प्राणसंचारकारणं धर्ममाह विहितेति वेदविहितेत्यर्थः स च कर्मनाशाजलस्पर्शकीर्तनभो
गतत्वज्ञानान्नश्यति अधर्ममाह निषिद्धेति वेदेनेति यावत् स च भोगप्रायश्चित्तादिना नश्यति एता

इच्छा कामः क्रोधो द्वेषः कृतिः प्रयत्नः विहितकर्मजन्यो धर्मः निषिद्धकर्मजन्यस्त्वधर्मः बुद्ध्यादयो
ष्टावात्ममात्रगुणाः बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च नित्या ईश्वरस्य अनित्या जीवस्य संस्का
रस्त्रिविधः वेगो भावना स्थितिस्थापकश्चेति वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः ॥ ॥ ॥

वेगादृष्टमिति कुण्ठितेवासनाजन्योच तत्सद्भावे चैत्रस्य शरीरादिकं चैत्रविशेषगुणजन्यकार्यत्वे सति चैत्रस
भोगहेतुत्वात् चैत्रप्रयत्नजन्यकुसुमपथ्यकादिवदित्यनुमानेन मानं लाघवमनुसृत्य बुद्ध्याद्यष्टगुणा
नामिदानीं युगपदाश्रयमाह बुद्ध्यादय इति अत्र मात्रपदमवधारणार्थं संस्कारं विभजते संस्कारेति.
सामान्यगुणात्मविशेषगुणोभयवृत्तिगुणत्वव्याप्यजातिमान् संस्कारः द्वितीयपतनासमवायिकारणं
वेगः स द्विधा कर्मजो वेगजश्च तत्राद्यो नोदनोत्पादककर्मजन्यः शरादौ प्रसिद्धः वेगवत्कपालजन्य

भावनां लक्षयति अनुभवेति आत्मादिवारणाय प्रथमदलं अज्ञानानुभवध्वंसेनाभिन्नो बोध्यः उद्बोधं-
त.दी. उद्बुद्धसंस्कार एव स्मृत्युपधायकः उद्बोधकं च चिंतनादिकं तदुक्तं सदृशादृष्टचिंताद्याः स्मृतिबीजस्य बोध
४५ काः इति अतीन्द्रियाः संस्कारे प्रतिस्मरणमपि कारणं स्थितिस्थापकमाहान्यथेति पृथिवीमात्रसमवेत
संस्कारत्वव्याप्यजातिमत्त्वं तत्त्वं आश्रयमाह कटादीति आदिना कार्मुकादेः परिग्रहः अथ गुणानां

अनुभवजन्या स्मृतिहेतुर्भावना आत्ममात्रवृत्तिः अ
न्यथाकृतस्य पुनस्तदवस्थापकः स्थितिस्थापकः कटादिपृथिवीवृत्तिः

साधर्म्यवैधर्म्यप्रक्रिया द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुण इति गदितमेव प्राक् रूपादिचतु
ष्टयसांसिद्धिकद्रवत्वस्नेहादिदृष्टभावनानां विशेषगुणत्वं तच्च पृथिवीसमवेतसमवेतनैकेन्द्रियग्राह्य राम·
सांसिद्धिकद्रवत्वभावनान्यत्व विशिष्टगुणत्वापरजात्यनधिकरणत्वे सति गुरुत्वान्यगुणत्वं सं ४४
ख्यादिष्टनैमित्तिकद्रवत्वस्थितिस्थापकवेगानां सामान्यगुणत्वं रूपादिचतुष्टयपरत्वापरत्वद्रवत्व

स्नेहवेगानांमूर्त्तवृत्तिगुणत्वं शब्दादिदशभावनामूर्त्तवृत्तिगुणत्वं संख्यादिपंचानांमूर्त्तामूर्त्तोभयवृत्तित्वंए
कभिन्नमात्रैकपृथक्त्वभिन्नपृथक्त्वसंयोगविभागानामनेकवृत्तिगुणत्वं तदन्येषांगुणानामेकैकवृत्ति
गुणत्वं रूपादिचतुष्टयशब्दानांवाह्यैकैकेंद्रियग्राह्यगुणत्वं संख्यादिसप्तद्रवत्वस्नेहवेगानांद्वींद्रियग्राह्य
गुणत्वं बुद्ध्यादिषट्स्यातींद्रियग्राह्यगुणत्वं गुरुत्वधर्माधर्मस्थितिस्थापकभावनानामतींद्रियगु
णत्वं अपाकजरूपादिचतुष्टयमध्यमपरिमाणैकपृथक्त्वगुरुत्वसांसिद्धिकद्रवत्वस्नेहवेगस्थिति
स्थापकानांकारणगुणपूर्वकत्वंजन्यद्व्यावृत्तिविशेषगुणानामकारणगुणपूर्वकत्वं संयोगवि
भागवेगानांकर्म्मासमवायिकारणत्वं कारणगुणासमवायिकारणत्वंच संयोगविभागशब्दाद्यष्ट
भावनानामव्याप्यवृत्तिगुणत्वं बुद्धीच्छाप्रयत्नद्वेषभावनानां सविषयत्वं गंधसंयोगादिचतुष्टय·
सुखदुःखद्वेषधर्माधर्मसंस्काराणामनित्यगुणत्वं तदितरगुणानांनित्यगुणत्वं वैधर्म्यपूर्ववद्बो
ध्यम् ॥ इतिश्रीसिद्धांतचन्द्रोदये गुणविशेषनिरूपणाम् तृतीयः परिच्छेदः ॥

त.दी.
५०

क्रमशामकर्मणः स्वरूपमाह चलनेति नलक्षणमुदीरितमेव प्राक् उत्क्षेपणं लक्षयति ऊर्ध्वेति ऊर्ध्वदेशस्य
देशेन च यः संयोगस्तस्यासमवायिकारणमित्यर्थः एवमग्रेऽपि न त्वभ्रमणरेचनस्पन्दनतिर्यग्गमनज्वल-
नानामतिरिक्तत्वेऽतः पंचत्वमत आह गमनान्यत्सर्वमिति इति कर्मविशेषनि. चतुर्थः ४ सामान्यनि-
रूपयति नित्यमिति आश्रयमाह द्रव्येति परसामान्यमाह परमिति अपरं तद्व्याप्यपरमिति इति पंच
मः परिच्छेदः ५ विशेषं निरूपयति व्यावर्तका इति स्वतइत्यर्थः इति षष्ठः परिच्छेदः ६ समवायं निरूप

चलनात्मकं कर्म ऊर्ध्वसंयोगहेतुरुत्क्षेपणं अधोदेशसंयोगहेतुरपक्षेपणं शरीरसंयोगसन्निकृष्टहेतु
राकुंचनं विप्रकृष्टसंयोगहेतुः प्रसारणं अन्यत्सर्वं गमनं नित्यमेकमनेकानुगतं सामान्यं द्रव्य
गुणकर्मवृत्तिः परं सत्ता अपरं जातिर्द्रव्यत्वादि नित्यद्रव्यवृत्तयो व्यावर्तकाः विशेषाः नित्यः संबं
धः समवायः अयुतसिद्धवृत्तिः ययोर्द्वयोर्मध्ये एकमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ अव
यवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति अनादिः सान्तः प्रा

यति नित्य इति स्थानमाहायुतसिद्धेति ननु युतसिद्धपदेन किं यावत् अत आह ययोरिति उक्तं च तावेवायुतसिद्धौ
द्वौ विज्ञातव्यौ ययोर्द्वयोः अविनश्यदेकमपराश्रितमेवावतिष्ठत इति कपालघटयोर्मध्ये एको घटोऽविनश्यन्
परं कपालमाश्रितमेवावतिष्ठत अतस्तावयुतसिद्धावित्यर्थः विनश्यदवस्थस्यापराश्रितत्वेनायुतसिद्धत्वे
नस्यादतस्तदुक्तं अविनश्यदिति उदाहरणं अवयवेति इति श्री समवायनिरूपणं सप्तमः ७ प्रागभा

[illegible] ॥
ए.म. ५

घटादिवारणाय प्रथमदलं परमाणुवारणाय द्वितीयदलं ननु प्रागभावः कस्मिन्काले स्तीत्यत आह उत्पत्तेरिति
कार्यस्योत्पत्तेः प्राक् स्वप्रतियोगिसमवायिकारणवर्त्ती त्यर्थः अथ प्रागभावः कथं सिद्ध्यतीति चेत् सत्या
मपि सामग्र्यामुत्पन्नस्य पुनरुत्पत्तिसाध्वसेनतान्सिद्धिः इहकपाले घटो भविष्यतीति प्रतीतिर्विषयमानं इति प्रा
गभावनिः ध्वंसं लक्षयति सादिरिति उत्पत्तीतिकार्य्यस्योत्पत्त्यनंतरं स्वप्रतियोगिसमवायिकारणवृत्तिरित्य
र्थः सच ध्वस्त इति प्रत्यय विषयः अत्यंताभावं दर्शयति त्रैकालिकेति त्रैकालिकत्वे सति संसर्गावच्छिन्नप्र
तियोगिताकोत्यंताभावः ध्वंसप्रागभाववारणाय त्रैकालिकेति भेदवारणाय संसर्गेत्यादि उदाहरति सहि
यः एकपर्य्याप्तधर्मावच्छिन्नप्रतियोगिताकः अनेकपर्य्याप्तधर्मावच्छिन्नप्रतियोगिताकश्च तत्राद्यो यथा
उत्पत्तेः सर्वकार्य्यस्य सादित्वेनतः प्रध्वंसः उत्पत्त्यनंतरं कार्यस्य त्रैकालिसंसर्गावच्छिन्नप्रतियोगिकोत्यं
ताभावः यथा भूतले घटो नास्तीति तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकोन्योन्याभावः घटोः पटो
नभवतीति ॥
घटत्वादिः द्वितीयउभयत्वादिः अयमेव व्यासज्यवृत्तिधर्म इत्युच्यते सम काभावो नोत्पद्यते
घटवति भूतले घटाभावस्य सत्वेपि सामग्र्यभावान्नत्वात्यंताभावः सा च सामग्री भूतलघटसंयोगप्रागभावध्वंसा
न्यतरत्तदा दृशप्रतीतिकालीनभूतलादिकं च प्रतियोगितावच्छेदकैकोपि एकप्रतियोगिकानां तेषां सं
सर्गभेदेन वहून विशेषाभावसमुदायात्सामान्याभावोतिरिक्त एव अनवस्थासाध्वसेन द्वितीयाभावो भाव
स्वरूप एवेति संप्रदायविदः भावस्य निषेधमुखप्रमाणागम्यत्वासंभवेनन्तृतीयाभावः प्रथमाभावस्वरूपं इति
नवीनाः इत्यमस्तां विस्तरः अन्योन्याभावं लक्षयति तादात्म्येति इति सिद्धांतचंद्रोदये अभावविशेषनिरूपणं ॥

त-टी- ५१

अथप्रमाणप्रमेयसंशयप्रयोजनेतिन्यायस्यप्रथमसूत्रेषोडशपदार्थानांप्रतिपादितत्वात्कथंसप्तत्वमत
आहान्येषामिति तथाचतेषांसाक्षान्मोक्षोपयोगित्वेनापिविभागइत्याकरेपिप्रतिपादितत्वादितिभावः कथ
मेतर्भावइतिचेन्नशामय प्रमाणस्यद्रव्यगुणयोरंतर्भावः आत्मशरीरेन्द्रियार्थेत्यादिप्रमेयप्रमेयसूत्रे तत्रा
घ्राणादीनांद्रव्ये चावतरादिविषयत्वपादपंचार्थानांगुणे आत्मनोदयेधर्माधर्मात्मकप्रवृत्तेर्गुणे रागद्वे
षमोहात्ममोहद्वेषस्यगुणेप्रेत्यभावोमरणोत्तरंजन्ममरणंचसमशरीरप्राणसंयोगध्वंसः आद्यशरीरप्राण
संयोगोजन्मसुखदुःखसंवेदनात्मकफलस्यगुणेदुःखस्यगुणे अपवर्गस्याभावे सचदुःखध्वंसरूपः संस्

अन्येषांसर्वेषांपदार्थानांयथायथमुक्तेष्वेवांतर्भावात्सप्तैवपदार्थाइतिसिद्धंकणादन्यायमतयोर्बा
लव्युत्पत्तिसिद्धये अन्नंभट्टेनविदुषारचितेनतर्कसंग्रहः ॥ इतितर्कसंग्रहप्रकरणंसमाप्तम् ॥ शुभमस्तु

यस्यगुणेसाध्यतयाकामनाविषयप्रयोजनस्ययथायथंइत्यादौ महानसादिदृष्टांतस्यप्रामाणिकत्वेना
भ्युपगतार्थसिद्धांतस्यचयथायथंइत्यादौ प्रतिज्ञाद्यवयवस्यतर्कस्यचनिर्णयस्यचतत्त्वबुभुत्सुकथारूप
वादस्यविजिगीषुकथारूपजल्पस्यचस्वपक्षस्थापनहीनकथायावितंडायाश्चगुणे हेत्वाभासानांयथोचित राम- ५१
इत्यादावंतर्भावः अभिप्रायांतरेणप्रयुक्तस्यार्थांतरपरिकल्पनरूपवाणाभिधानेच्छलतस्यगुणे असदुत्तरंजा
तिस्तस्याःपितचपराजयहेतुर्निग्रहस्थानंतच्चप्रतिज्ञाहानिः प्रतिज्ञांतरंप्रतिज्ञाविरोधइत्यादिकंबहुविधं
यथायथं इत्यवधावित ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ननु मणिसत्वे दाहानुत्पादनाद्भावरूपा नित्या शक्तिरिति चेन्नोत्तेजकाभावविशिष्टमण्यभावस्यापि
दाहकारणत्वेन तत्सामान्याभावात् नापि सादृश्यं पदार्थांतरं तच्च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्वं मुहु
इति नातिरिक्तं किंतु भस्मादिसंयोगसमानकालीनास्पर्शस्पर्शप्रतियोगिकयावद्भावसहितभस्मादि
संयोगध्वंस इति संक्षेपः ॥ इति श्रीसिद्धांतचंद्रोदये निरुक्तपदार्थविवेचनं नाम नवमः परिच्छेदः ९
पदार्थज्ञानस्य परमप्रयोजनं मोक्षः तत्र मोक्षोऽत्यामनेति स च स्वर्गादिरिति मीमांसकाः नित्यसुखाभिव्यक्तिरिति तदे
कदेशिनः अहंकारनिवृत्तिर्वौदासीन्यमिति सांख्याः ब्रह्मांशकजीवस्याविद्याप्रभवमिथ्याज्ञाननि
वृत्तौ स्वस्वरूपताधिगम इति वेदांतिनः सारूप्यसालोक्यसामीप्यसायुज्यभेदाच्चतुर्विध इति सगुणोपास
काः स्वपराधीनतेति चार्वाकाः ऊर्द्धगतिरित्यपि केचित् तत्सर्वं धीमतां चिंत्यं अपि त्वात्यंतिकैकविं
शति दुःखध्वंसः आत्यंतिकत्वं च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वं दुःखानि चै
कविंशतिः शरीरषडिंद्रियाणि षड्विषयाः षड्बुद्धयः सुखं दुःखं चेति दुःखानुषंगित्वात्सुखशरीरादीनां गौ
ण दुःखत्वं तथा चात्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुतेरात्मज्ञानसाधनं निदि
ध्यासनं तत्साधनं मननं तत्साधनं च पदार्थज्ञानं जागर्तीति एवं च सति तत्वज्ञाने शरीरपुत्रदारादिषु स्वीयत्वा
भिमानरूपमिथ्याज्ञानस्य नाशः तेन दोषाभावस्तेन प्रवृत्त्यनुत्पत्तिः ततस्तत्कालीनशरीरेण कायव्यू
हेन भोगात तत्त्वज्ञानाभ्यां प्रारब्धकर्मणां नाशः ततो जन्माभावः नित्यनैमित्तिकैरेव ऊर्ध्वापोऽडीरितत्य

(12)

ज्ञानंचविमलीकुर्वन्नभ्यासेनयाचयेत् अभ्यासात्पक्वविज्ञानेकैवल्यंलभतेनरइति आदिवचनात्
तमेवविदित्वातिमृत्युमेतीतिश्रुतेश्चासगुणोपासनाकाशीमरणादेरपितत्त्वज्ञानद्वारामुक्तिहेतुत्वं
न. सी. अतएवपरमेश्वरःकाश्यांतरकमुपदेशतीतिसारं इतिश्रीसिद्धांतचंद्रोदयेमोक्षनिरूपणंनामाष्टद-
५२ शःपरिच्छेदः इतिश्रीकौशिकोद्भवसामशाखाध्यापकोयंपुरीवासिवैकुंठदीक्षितात्मजेनशेषोनाम
सतीगर्भसंभवेनमहाराष्ट्रज्ञातीयचित्तामोपनामकपुण्यनगरनिकेतनश्रीकाशीनाथभट्टशिष्ये
णाद्रविडज्ञातीयेनश्रीकृष्णधूर्जटिदीक्षितेनऊर्द्ध्वदलादतीतपंचसप्ताधिकाष्टशतोत्तरवत्सः सह-
स्रवर्षीकेकलियुगेप्रकटितेपंचदशाधात्यंथकिरणालेहनेसिद्धांतचंद्रोदयेसमाप्तिर्विसर्जितमाम्
शुभमस्तुनवरघुनाथपदद्वयपंकजनतोजगतः सततं ममविलिखितनजाश्रुपरिश्रमतोरघुनंदन
एवमुदंतनुपात् ॥ पुस्तकमिदंगौरीशंकरस्य

राम
५२

[illegible]